थोचिताः। गुग्गुलुर्योगराजोऽयं त्रिदोषघ्नो रसायनः। मैथुनाहारपानानां त्यागो नैवात्र विद्यते।। सर्वान्वातामयान्कुष्ठमर्शांसि
ग्रहणीगदं। प्रमेहं वातरक्तं च नाभिशूलं भगंदरं। उदावर्तं क्षयं गुल्ममपस्मारमुरोग्रहं। मंदाग्निं श्वासकासांश्च नाशयेदरुचिं
तथा। रेतोदोषहरः पुंसां रजोदोषहरः स्त्रियाः। पुंसामपत्यजनको वंध्यानां गर्भदस्तथा। रास्नादिक्वाथसंयुक्तो विविधं हंति
मारुतं। काकोल्यादिशृतात् पित्तं कफमारग्वधादिना। दार्वीशृतेन मेहांश्च गोमूत्रेण च पांडुतां। मेदोवृद्धिं च मधुना कुष्ठं निंबशृ
तेन वा। छिन्नाक्वाथेन वातास्रं शोथं शूलं कणाजलात्। पाटलाक्वाथसहितो विषं मूषकजं जयेत्। त्रिफलाक्वाथस
हितो नेत्रार्तिं हंति दारुणां। पुनर्नवादिक्वाथेन हन्यात्सर्वोदराण्यपि। योगराजगुग्गुलुः। त्रिफलायास्त्रयः प्रस्थाः प्रस्थैक
ममृता भवेत्। संकुट्य लोहपात्रे च सार्धद्रोणांबुना पचेत्। जलमर्धशृतं ज्ञात्वा गृह्णीयाद्वस्त्रगालितं। ततः क्वाथे क्षिपेत् शुद्धं
गुग्गुलुं प्रस्थसंमितं। पुनः पचेदयःपात्रे दर्व्या संघट्टयेन्मुहुः। सांद्रीभूतं च तं ज्ञात्वा गुडपाकसमाकृतिं। चूर्णीकृत्य ततस्तत्र द्र शाम॰
व्याणीमानि निक्षिपेत्। त्रिफला द्विपला ज्ञेया गुडूची पलिका मता। षडंशं त्र्यूषणं प्रोक्तं विडंगानां पलार्द्धकं। दंती कर्षमिता का २३

र्यो त्रिवृत्कर्षमिता स्मृता। ततः पिंडीकृतं सर्वं घृतपात्रे विनिक्षिपेत्। गुटिकाः शाणिकाः कृत्वा युंज्याद्दोषबलेपेद्वया। अनुपाने भिषक् दद्या
त्कोष्णं नीरं पयोथवा। मंजिष्ठादिशृतं वापि युक्तिसुक्तमुतापरं॥ जयेत्सर्वाणि कुष्ठानि वातरक्तं त्रिदोषजं। सर्वव्रणानि गुल्मांश्च प्रमे
हपिडकास्तथा। प्रमेहोदरमंदाग्निकासश्वयथुपांडुताः। हंति सर्वामयान्नित्यमुपयुक्तो रसायनः। कैशोरकाभिधानोयं गुग्गुलुः कां
तिकारकः। वासादिना नेत्रगदान्गुल्मादीन्वरुणादिना। क्वाथेन खदिरस्यापि व्रणान्कुष्ठानि नाशयेत्। अम्लं तीक्ष्णमजीर्णं च व्य
वायं श्रममातपं। मद्यं रोषं त्यजेत्सम्यक् गुणार्थी पुरसेवकः। कैशोरकगुग्गुलुः। त्रिपलं त्रिफलाचूर्णं कृष्णाचूर्णपलोन्मितं। गुग्गु
लुः पंचपलिकः क्षोदयेत्सर्वमेकतः। ततस्तु गुटिकां कृत्वा प्रयुंज्याद्वन्हिपेक्षया। भगंदरं गुल्मशोथावर्शांसि च विनाशयेत्। त्रिफलागु
ग्गुलुः। अमृतद्विंशतिसंख्यानि पलान्यानीय गोक्षुरोः। विपचेत्षड्गुणे नीरे क्वाथो ग्राह्योऽर्द्धशोषितः। ततः पुनः पचेत्तत्र पुरं सप्तपलं
पचेत्। गुडपाकसमाकारं ज्ञात्वा तत्र विनिक्षिपेत्। त्रिकटुत्रिफलामुस्तचूर्णितं पलसप्तकं। ततः पिंडीकृतस्यास्य गुटिकामुपयोजयेत्।
हन्यात्प्रमेहं कृच्छ्रं च प्रदरं मूत्रघातकं। वातास्रं वातरोगांश्च शुक्रदोषं तथाश्मरीं। गोक्षुरादिगुग्गुलुः। त्रिफलाष्टपला कर्षामहा
तानां चतुः पलं। वाकुची पंचपलिका विडंगानां चतुः पलं। हतं लोहं त्रिवृच्चैव गुग्गुलुश्च शिलाजतु। एकैकं पलमात्रं स्यात्पलार्द्धं पौ
क्षारं भवेत्। चित्रकस्य पलार्द्धं स्यात्द्विशाणं मरिचं भवेत्। नागरं पिप्पली मुस्तं त्वगेलापत्रकुंकुमं। शाणोन्मितं स्यादेकैकं चूर्णयेत्स
र्वमेकतः। ततस्तत्र क्षिपेत्स्वर्णपक्वखंडे च तत्समे। मोदकान्पलिकान्कृत्वा प्रयुंजीत यथोचितं। हन्युः सर्वाणि कुष्ठानि त्रिदोषप्रभवा

म पानं।मंदाग्निप्लीहगुल्माग्निकामतालुगलामयान्।शिरोक्षिकर्णगतान्रोगान्नस्यात्सम्यग्दानपि प्रणाशभोजनस्य देयं स्याद्दोषःकाप
स्थितेरोदे।।भेषजं भक्तमध्ये च रोगे जठरसंस्थिते।भोजनस्योपरि ग्राह्यमर्ध्वजत्रुगदेषु च।त्रिफलामोदकः।।कांचनारत्वचो ग्राह्यं पल
विंशतिकं बुधैः।त्रिकटु द्वादशपलं त्रिफला षट्पला मता।पलैकं वरुणः कार्य एलात्वक्पत्रजं तथा।एकैकं कर्षमात्रं स्यात्सर्वाण्येकत्र चू
र्णयेत्।यावच्चूर्णमिदं सर्वं तावन्मात्रस्तु गुग्गुलुः।संकुट्य सर्वमेकत्र पिंडं कृत्वा च धारयेत्।।गुटिकाः शाणिकाः कृत्वा प्रातर्ग्राह्या यथोचि
तम्।गंडमालां जयत्युग्रामपचीमर्बुदानि च।ग्रंथीन्व्रणांश्च गुल्मांश्च कुष्ठानि च भगंदरं।प्रदेयश्चानुपानार्थं क्वाथो मुंडितिकाभ
वः।क्वाथः खदिरसारस्य पथ्याक्वाथोष्णवोदकं।।कांचनारगुग्गुलुः।।निस्तुषं माषचूर्णं स्यात्तथा गोधूमसंभवं।निस्तुषं यवचूर्णं च
शालितंडुलजं तथा।सूक्ष्मं च पिप्पलीचूर्णं पालिकान्युपकल्पयेत्।तत एकीकृतं सर्वं मर्दयेत्साधु तेन च।अर्द्धमात्रेण सर्वेमात्ते
तः खंडं समं क्षिपेत्।जलं च द्विगुणं दत्वा पाचयेत्तं शनैः शनैः।ततः पक्वं समुद्धृत्य घृतैः कुर्वीत मोदकान्।भुक्त्वा सायं पलैकं च पिबेत्त
दीरं चतुर्गुणं।वर्जनीयो विशेषेण क्षाराम्लो द्वौ रसावपि।कृत्वैवं रमते नारीर्बह्वीर्नेर्ष्यायते नरः।माषादिमोदकः।। ।।इति श्री दामो
दरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने गुटिककल्पनाध्यायः।।७।। क्वाथादेर्यत्पुनः पाकाद्घनत्वं सा रसक्रिय
यते।सोऽवलेहश्च लेहस्तन्मात्रा स्यात्पलोन्मिता।सिता चतुर्गुणा कार्या चूर्णाद्द्विगुणो गुडः।द्रवं चतुर्गुणं दद्यादिति सर्वत्र निश्च
यः।सुपक्वे तंतुमत्वं स्यादवलेहोऽप्सु मज्जने।स्थिरत्वं पीडिते मुद्रा गंधवर्णरसोद्भवः।दुग्धमिक्षुरसं यूषं पंचमूलकषायजं।वासा

क्वाथं पथ्यं योगपमनुपानं प्रशस्यते॥ सयथा॥ कंटकारीतुलां नीरद्रोणे पक्त्वा कषायके। पादशेषं गृहीत्वा च तस्मिन् चूर्णानि दापयेत्।
पृथक्कुपलांशान्येतानि गुडूचीचव्यचित्रकाः। मुस्तं कर्कटशृङ्गं मरिचत्र्यूषणं धन्वयासकः। भार्ङ्गी रास्ना शटी चैव शार्करापलविंशतिः। प्र :पलं तु २
५३ त्येकं च पलान्यष्टौ प्रदद्यात् घृततैलयोः। पक्त्वा लेहत्वमानीतं शीते मधुपलाष्टकं। चतुर्गाक्षीर्याः पिप्पलीनां चतुःपलं। क्षिप्त्वा निदध्या-
त्सुदृढे मृन्मये भाजने शुभे। लेहोऽयं हन्ति हिक्काग्निकासश्वासानशेषतः॥ कंटकार्यवलेहः॥ पाटलारणिकाश्मर्यबिल्वारलुकगो-
क्षुराः। पर्ण्यौ बृहत्यौ पिप्पल्यः शृङ्गी द्राक्षामृताभया। बलाभूम्यामली वासा ऋद्धिर्जीवंतिका शटी। जीवकर्षभकौ मुस्तं पौष्करं का-
कनासिका। मुद्गपर्णी माषपर्णी विदारी च पुनर्नवा। काकोली कमलं मेदा सूक्ष्मैलाः गुरुचंदनं। एकैकं पलसंमानं स्थूलकणितमौ-
षधं। एकीकृत्य महत्पात्रे पंचामलशतं तथा। पचेद्द्रोणजले क्षिप्त्वा ग्राह्यमष्टावशेषितं। ततस्तु तान्यामलानि निष्कुलीकृत्य वासस-
दृढहस्तेन संमर्द्य क्षिप्त्वा तत्र ततो घृतं। पलसप्तमितं तानि निष्किंचिद्भृष्ट्वाऽस्य वह्निना। ततस्तत्र क्षिपेत्क्वाथं खंडं चार्द्धतुलोन्मितं। लेह-
वत्साधयित्वा च चूर्णानीमानि दापयेत्। पिप्पली द्विपलादेया तुगाक्षीरी चतुःपला। प्रत्येकं च त्रिशाणाः स्युस्त्वगेलापत्रकेसराः॥ ततस्त्वे-
कीकृते तस्मिन् क्षिपेत्क्षौद्रं च षट्पलं। इत्येवं च्यवनप्रोक्तं च्यवनप्राशसंज्ञितं। लेहं वह्निबलं दृष्ट्वा यो देहीनां रसायनं। बालावृद्धः
क्षतक्षीणा नारीक्षीणाश्च शोषिणः। हृद्रोगिणः स्वरक्षीणा ये नरास्तेषु पूज्यते। कासं श्वासं पिपासां च वातास्रमुरसो ग्रहं। वातं पित्तं
शुक्रदोषं मूत्रदोषं च नाशयेत्। मेधां स्मृतिं स्त्रीषु हर्षं कांतिं वर्णप्रसन्नतां। अस्य प्रयोगात् प्राप्नोति नरो जीर्णविवर्जितः। च्यवन-
प्राशावलेहः॥ निष्कुलीकृतकूष्मांडखंडानां पलशतं पचेत्। निक्षिप्य द्वितुलानीरमर्द्धशिष्टं च गृह्यते। तानि कूष्मांडखंडानि पीड-

शार्ङ्ग॰
२५

यद्दृढवा ससा। स्रातयेत्तोयेल्किंचित स्थलाग्रेर्बहुत्तो व्यधेत। द्विष्वा नाम्रकटाहे च दद्यात् ताष्टपलं घृतं। तेन किंचिद्भृजेपित्वा
एर्वी कंत ऽड्ढ लं क्षिपेत। खंडात्पलेशतं दत्वा सर्वमेकत्रयाचयेत। सुपक्के पिप्पली शुंठी जीरातां क्षिपलं पृथक्। पृथका लाईं
धान्याकपत्रैलाम रिचत्वचां। चूर्णी कृत्य क्षिपेत्तत्र घृतार्द्धं क्षौद्रमावपेत। खादेदग्नि बलं दृष्ट्वा रक्तपित्ती ज्वरी क्षयी। शोष
तृष्णा तमश्छर्दिकासश्वासहृता तुरः। कूष्मांडकावलेहोयं बाले वृद्धे च युज्यते। उरः संधानकृद्धृष्यो बृंहणो बलकृन्मतः॥
कूष्मांडकावलेहः॥ पुष्पाकू ष्मांडखंडस्य स्वरसं विपचेत्सुधीः। स्त्रीसां मठवाता नामं दाग्नीतां च युज्यते॥ खंडकूष्मा
लेहः॥ हरीतकीशतं भद्र यवानां माढकं तथा। पलानि दशमूलस्य विंशतिं च नियोजयेत॥ चित्रकः पिप्पलीमूलमपामा
र्गः सटी तथा। कपिकच्छूः शंखपुष्पी भार्ङ्गी च गजपिप्पली। बला पुष्करमूलं च पृथक् क्षिपलमात्रया। पचेत्पंचाढके नीरे यवैः
स्विन्नैः सृतं नयेत। तत्साभयाशतं दद्यात्क्काथे तस्मिन्विचक्षणः। सर्पिस्तैलाष्टपलकं क्षिपेद्गुडतुलां तथा। यत्वालेहत्वमानीय
सिद्धे शीते पृथक् पृथक्। क्षौद्रं च पिप्पलीचूर्णं दद्यात्कुडवमात्रया। हरीतकी द्वयं खादेत्तेन लेहेन नित्यशः। क्षयं कासं ज्व
रं श्वासं हिक्काशीऽरुचि पीनसान्। ग्रहणीं नाशयत्येष वलीपलितनाशनः॥ अगस्तिहरीतकावलेहः॥ कुटजत्वक्तु
लां द्रोणे जलस्य विपचेत्सुधीः। कषायं पादशेषं च मूल्ही यावस्त्रगालितं। त्रिंशत्पलं गुडस्यात्र दत्वा च विपचेत्पुनः। सांद्र
त्वमागतं दृष्ट्वा चूर्णानीमानि दापयेत। रसांजनं मोचरसं त्रिकटु त्रिफलां तथा॥ लज्जालुं चित्रकं पाठा बिल्वमिंद्रयवं त्व
चं। भल्लातकं प्रतिविषां विडंगानि च वालकं॥ प्रत्येकं पलसंमानं घृतस्य कुडवं तथा। सिद्धशीते ततो दद्यान्मधुनः कुडवं तथा। उ

शाम॰
२५

येदेषोवलेहस्तुसर्वाण्यर्शांसिवेगतः।दुर्नामप्रभवान्रोगानतीसारंप्रमेहंचकासंग्रहणींपाण्डुरोगंचरक्तपित्तंचकामलां।अग्लपि
त्तेतथाशोथंकार्श्यंचैवप्रवाहिकां।अनुपानेप्रयोक्तव्यमाजंतक्रंपयोदधि।घृतंजलंवाजीर्णेचपथ्यभोजीभवेन्नरः॥कुटजाद्यावले
हः॥कुटजत्वक्तुलामार्द्रांद्रोणनीरेविपाचयेत्।पादशेषंसृतंनीत्वाचूर्णान्येतानिदापयेत्।जलजालुर्धातकीबिल्वंपाठामोच
रसंतथा।मुस्तंप्रतिविषाचैवप्रत्येकंस्यात्पलंपलं।ततस्तुविपचेत्सम्यग्यावद्दर्वीप्रलेपनं।जलेनछागदुग्धेनपीतोमंडेनवाज
येत्।सर्वातिसारान्घोरांस्तुनानावर्णान्सवेदनान्।असृग्दरंसमस्तंचसर्वार्शांसिप्रवाहिकां॥कुटजाष्टकावलेहः॥ ॥इतिश्री
दामोदरसूनुनाशार्ङ्गधरेणविरचितायांसंहितायांचिकित्सास्थानेऽवलेहकल्पनाध्यायः॥८॥कल्कश्चतुर्गुणीकृत्यघृतंवा
तैलमेववा।चतुर्गुणद्रवेसाध्यंतस्यमात्रापलोन्मिता।निक्षिप्यक्वाथयेत्तोयंक्वाथ्यद्रव्याच्चतुर्गुणं।पादशिष्टंगृहीत्वातुस्नेहंतेनैवसाध
येत्।चतुर्गुणंमृदुद्रव्येकठिनेष्टगुणंजलं।तथाचमध्यमद्रव्येदद्यादष्टगुणंपयः।अत्यंतकठिनद्रव्येनीरंषोडशिकंमतं।कर्षादि
तःपलंयावन्निक्षिपेत्षोडशिकंजलं।तदूर्ध्वंकुडवंयावत्भवेदष्टगुणंपयः।प्रस्थादितःक्षिपेन्नीरंखारीयावच्चतुर्गुणं।अंबुक्वाथर
सैर्यत्रपृथक्स्नेहस्यसाधनं।कल्कस्यांशंतत्रदद्याच्चतुर्थंषष्ठमष्टमं।दुग्धेदध्निरसेतक्रेकल्कोदेयोऽष्टमांशकः।कल्कस्यसम्यक्
पाकार्थंतोयमत्रचतुर्गुणं।द्रवाणियत्रस्नेहेषुपंचादीनिभवंतिहि।तत्रस्नेहसमान्याहुर्यथापूर्वंचतुर्गुणं।द्रव्येणकेवलेनैवस्ने
हपाकोभवेद्यदि।तत्रांबुपिष्टःकल्कःस्याज्जलंचात्रचतुर्गुणं।क्वाथेनकेवलेनैवपाकोयत्रेरितःक्वचित्।क्वाथ्यद्रव्यस्यकल्कोपितत्र

शार्ङ्ग स्नेहप्रयोऽप्येत। कल्कहीनस्तु यः स्नेहः स साध्यः केवले द्रवे। पुष्पकल्कस्तु यः स्नेहस्तत्र तोयं चतुर्गुणं। स्नेहे स्नेहाऽष्टमांशश्च पुष्पकल्कः
२६ प्रयुज्यते। वर्त्तिवत्स्नेहकल्कः स्यात् यदांगुल्या विवर्त्तितः। शब्दहीनोऽग्निनिक्षिप्तः स्नेहः सिद्धो भवेत्तदा। यदा फेनोद्गमस्तैले फेनशांतिश्च
सर्पिषि। वर्णगंधरसोत्पत्तिः स्नेहसिद्धिस्तदा भवेत्। स्नेहपाकस्त्रिधा प्रोक्तो मृदुर्मध्यः खरस्तथा। ईषत्सरसकल्कस्तु स्नेहपाको मृदु
र्भवेत्। मध्यपाकस्य सिद्धिश्च कल्के नीरसकोमले। ईषत्कठिनकल्कश्च स्नेहपाको भवेत्खरः। तदूर्ध्वं दग्धपाकः स्याद्दाहकृन्निःप्रयो
जनः। आमपक्वश्च निर्वीर्यो वह्निमांद्यकरो गुरुः। नस्यार्थं स्यान्मृदुः पाको मध्यमः सर्वकर्मसु। अभ्यंगार्थे खरः प्रोक्तो युंज्यादेवं यथो
चितं। घृततैलगुडादींश्च साधयेन्नैकवासरे। प्रकुर्वंत्युषिता स्नेहा विशेषाद्गुणसंचयं॥ सपथ्या॥ पिप्पली पिप्पलीमूलचव्यचित्र
कनागरैः। ससैंधवैश्च पलिकैः घृतप्रस्थं विपाचयेत्। क्षीरं चतुर्गुणं दत्वा तद्घृतं प्लीहनाशनं। विषमज्वरमंदाग्निहरं रुचिकरं
परं। क्षीरषट्पलं घृतं॥ पिप्पली पिप्पलीमूलं चित्रको हस्तिपिप्पली। श्वदंष्ट्रा नागरं धान्यं पाठा विल्वं यवानिका। द्रव्यैश्च पलिके
रेतैश्चतुःषष्टिपलं घृतं। घृतात्चतुर्गुणं दद्याच्चांगेरीस्वरसं बुधः। तथा चतुर्गुणं दत्वा दधि सर्पिर्विपाचयेत्। शनैः शनैर्विपक्वं च चांगे
री घृतमुत्तमं। तत्र घृतं कफवातघ्नं ग्रहण्यर्शोविकारनुत्। हत्यानाहं गुदभ्रंशं मूत्रकृच्छ्रं प्रवाहिकां। चांगेरी घृतं॥ मसूराणां
पलशतं नीरद्रोणे विपाचयेत्। पादशेषं शृतं नीत्वा दत्वा विल्वपलाष्टकं। घृतप्रस्थं पचेत्तेन सर्वातीसारनाशनं। ग्रहणीं प्लि रा. म.
न्न विबंधं च नाशयेच्च प्रवाहिकां॥ मसूराद्यं घृतं॥ अश्वगंधा तुलैका स्यात् दशमूलं तुरः स्मृतः। बलामृतान्नालपर्णी विदारी २६

चशतावरी । पुनर्नवाऽश्वत्थस्य शुंगं काश्मर्यास्तु फलान्यपि । पद्मबीजं माषबीजं दृढा दशपलं पृथक् । चतुर्द्रोणेंभसः पक्त्वा
पादशेषं शृतं नयेत् । जीवनीयगणः कुष्ठं पद्मकं रक्तचंदनं । पत्रकं पिप्पली द्राक्षा कपिकच्छुफलं तथा । नीलोत्पलं नागपुष्पं
सारिवे द्वे तथा बला । पृथक्कर्षसमा भागाः शर्करायाः पलद्वयं ॥ रसं च पौंड्रकेक्षूणामाढकैकं समाहरेत् ॥ घृतस्य चाढकं
दत्वा पाचयेन्मृदुनाग्निना । घृतमेतन्निहंत्याशु रक्तपित्तमुरःक्षतं । हलीमकं पांडुरोगं वर्णभेदं स्वरक्षयं । वातरक्तं मूत्रकृच्छ्रं पा
र्श्वशूलं च कामलां । शुक्रक्षयमुरोदाहं कार्श्यं शोजः क्षयं तथा । स्त्रीणां चैवाऽप्रजातानां गर्भदं शुक्रवर्द्धनं । कामदेवघृतं ना
म हृद्यं बल्यं रसायनं ॥ कामदेवघृतं ॥ त्रिफला द्वे निशे कौंती सारिवे द्वे प्रियंगुका । शालपर्णी पृश्निपर्णी देवदार्वेलवालुकं ।
नंतं विशाला दंती च दाडिमं नागकेसरं नीलोत्पलैलामंजिष्ठाविडंगं कुष्ठपद्मकं । जातीपुष्पं चंदनं च तालीसं बृहती तथा । एतैः
कर्षसमैः कल्कैर्जले दत्वा चतुर्गुणं । घृतप्रस्थं पचेद्धीमानपस्मारे ज्वरे तथोन्मादे वातरक्ते च कासे मंदानले तथा । प्रतिश्याये कटीशू
ले तृतीयकचतुर्थके मूत्रकृच्छ्रे विसर्पे च कंडूपांड्वामये तथा । विषदये प्रमेहे च सर्वथैवोपयुज्यते । वंध्यानां पुत्रदं मतपवरहो
हरं घृतं ॥ पानीयकल्याणघृतं ॥ अमृताक्वाथकल्काभ्यां सक्षीरं विपचेद्घृतं । वातरक्तं जयत्याशु कुष्ठं जयति दुस्तरं ॥ अमृता
द्यघृतं । सप्तच्छदः प्रतिविषा शम्याकः कटुरोहिणी । पाठा मुस्तमुशीरं च त्रिफला पर्पटस्तथा । पटोलनिंबमंजिष्ठा पिप्पली
पद्मकं शटी । चंदनं धन्वयासश्च विशाला द्वे निशे तथा । गुडूची सारिवे द्वे च मूर्वा वासा शतावरी । त्रायंतीन्द्रयवोयष्टीभूनिंबश्या

शार्ङ्ग॰ त्रभागिकः।घृतंचतुर्गुणंदद्यात्घृतादामलकीरसः॥द्विगुणःसर्पिषश्चात्रजलमष्टगुणंभवेत्।तत्सिद्धंपाययेत्सर्पिर्वातरक्ते
२७ षुसर्वथा।कुष्ठानिरक्तपित्तंचरक्तार्शांसिचपांडुतां।हृद्रोगंगुल्मवीसर्पप्रदरंगंडमालिकां।क्षुद्ररोगान्ज्वरंचैवमहातिक्तमि
दंजयेत्॥महातिक्तकंघृतं॥कासीसंद्वेनिशेमुस्तंहरितालंमनःशिला।कंपिल्लकंगंधकंचविडंगंगुग्गुलुंतथा।सिक्थकंम
रिचंकुष्ठंतुत्थकंगौरसर्षपान्।रसांजनंचसिंदूरंश्रीवासंरक्तचंदनं।अरिमेदंनिंबपत्रंकरंजंसारिवांवचां।मंजिष्ठांमधुकंमां
सींशिरीषंलोध्रपद्मकं।हरीतकींप्रपुंनाटंचूर्णयेत्कार्षिकान्पृथक्।ततस्तच्चूर्णमालोड्यत्रिंशत्पलमितेघृते।स्थापयेत्ताम्र
पात्रेणघर्मेसप्तदिनानिच।अस्याभ्यंगेनकुष्ठानिदद्रूपामाविचर्चिकाः।शूकदोषाविसर्पाश्चविस्फोटावातरक्तजाः।शिरःस्फो
टोपदंशौचनाडीदुष्टव्रणानिच।शोथोभगंदरश्चैवलूताःशाम्यंतिदेहिनां।शोधनंरोपणंचैवसवर्णकरणंघृतं॥कासीसा
द्यंघृतं॥जातीनिंबपटोलानिद्वेनिशेकटुकीतथा।मंजिष्ठामधुकंसिक्थंकरंजोशीरसारिवाः।तुत्थंचविपचेत्सम्यक्क
ल्कैरेभिर्घृतंबुधः।अस्माल्लेपाद्विरोहंतिसूक्ष्मनाडीव्रणा।अपि।मर्माश्रिताःक्लेदिनश्चगंभीराःसरुजोव्रणाः।जात्याद्यंघृतं॥
चित्रकःशंखिनीपथ्याकंपिल्लस्त्रिवृतायुगं।वृद्धदारश्चशम्याकोदंतीदंतीफलंतथा।कोशातकीदेवदालीनीलीचगिरि
कर्णिका।सप्तलापिप्पलीमूलंविडंगंकटुकीतथा।हिमक्षीरीचविपचेत्कल्कैरेभिःपिचून्मितैः।घृतप्रस्थंस्नुहीक्षीरेषट्प शा॰म॰
लेतुपलद्वये।अर्कक्षीरस्यमतिमान्तत्सिद्धंगुल्मकुष्ठहृत्।हंतिमूलमुदावर्तंशोथाध्मानभगंदरान्।शमयत्युदराण्याशुनि २७

पीतं हिंगुसंख्यया गोदुग्धे नोष्ट्रदुग्धेन कौलत्थेन सृतेन वा। उष्णोदकेन वापीत्वा विडंगवेगोर्विरच्यते। एतद्धिंगुघृतं नाम नाम्नामि
लेपाद्धि रिच्यते। विडंगघृतं॥ त्रिफलायाः सप्रस्थं प्रस्थं वासारसो द्रवं। अंगराजपयः प्रस्थं प्रस्थमाजपयः स्मृतं। एलात त्र घृ
तप्रस्थं कल्कैः कर्षमितैः पृथक्। त्रिफलापिप्पलीद्राक्षा चंदनं सैंधवं बला। काकोली क्षीरकाकोली मेदा मरिच नागरं। शर्करा
पुंडरीकं च कमलं च पुनर्नवा। निशायुग्मं च मधुकं सर्वैरेभिर्विपाचयेत्। नक्तांध्यं नकुलांध्यं च कंडूपीडां तथैव च। नेत्रस्रावं
चपटलं तिमिरं चाऽर्जकं जयेत्। अन्येपि प्रशमं यांति नेत्ररोगाः सुदारुणाः। त्रैफलं घृतमेतद्धि पाने नस्यादि पूजितं॥ त्रैफ
लं घृतं॥ द्विहरिद्रा स्थिरा मूर्वा सारिवा चंदनद्वयैः। मधुपर्णी च मधुकं पद्मकेसरपद्मकैः॥ उत्पलैः क्षीरमेदाभिस्त्रिफलापंचवल्क
लैः। कल्कैः कर्षमितैरेतैर्घृतप्रस्थं विपाचयेत्॥ विसर्पलूताविस्फोटविषकीटव्रणापहम्। गौराद्यमिति विख्यातं सर्पिर्विष
हरं स्मृतं॥ गौराद्यं घृतं॥ बलामधुकरास्नाभिर्द्राक्षामलकफलत्रिकैः॥ पृथक् द्विपलिकैरेभिर्द्रोणीनीरेण पाचयेत्॥ प्रपूरं पक्वपि
न्तांत्रचाकृत्वा हासवर्जितं। पादशेषं घृतं नीलोत्पलीरं दत्वा च ततस्समे। घृतप्रस्थं पचेत्सम्यक् जीवनीयैः पिचून्मितैः। तन्निहं
शिरसः पीडा मन्यापृष्ठग्रहं तथा। अर्दितं कर्णनासाक्षिजिह्वागलरुजां जयेत्॥ पानेन नस्येन तथाऽभ्यंगे कर्णपूरेषु युज्यते। हेम
तकाले शिशिरे वसंते सु च सेव्यते॥ मयूरघृतं॥ त्रिफलामधुकं कुष्ठं द्वे निशे कटुरोहिणी। विडंगं पिप्पलीमुस्तं विशाल
कट्फलं वचा। द्वे मेदे द्वे चक्राकोल्यौ सारिवे द्वे प्रियंगुका। ज्ञातपुष्पं हिंगुरास्ना चंदनं रक्तचंदनम्। जातीपुष्पं तुगाक्षीरीक

शार्ङ्ग मलं शार्करा तथा। अजमोदा च दंती च कल्कैरेतैश्च कार्षिकैः॥ जीवद्वत्सैकवर्णानां घृतप्रस्थं गवां पचेत्। चतुर्गुणेन पयसा पचेद्दा
१८ रएयगोमयैः॥ सुस्निग्धो पुष्यनक्षत्रे मृद्भांडे ताम्रजेऽथवा। ततः पिबेच्छुभदिने नारी वा पुरुषोऽथवा। एतत्सर्पिर्नरः पीत्वा स्त्रीषु
नित्यं वृषायते। पुत्रानुत्पादयेद्धीरान्वंध्यापि लभते सुतं। अल्पायुषं या जनयेद्या च सूत्वा पुनः स्थिता। पुत्रं प्राप्नोति सा नारी बुद्धि
मंतं शतायुषं। एतत्फलघृतं नाम भारद्वाजेन भाषितं। अनुक्तं लक्ष्मणामलं क्षिपेत्तत्र चिकित्सकः॥ फलघृतं॥ वृषपत्रं वाऽमृता
व्याघ्रीपटोलानां स्वरसेन च॥ कल्केन पक्वं सर्पिस्तु निहन्याद्विषमज्वरान्। पांडुकुष्ठं विसर्पं च कृमीनर्शांसि नाशयेत्। पंच
तिक्तकं घृतं॥ सहाचरो द्वौ त्रिफलां गुडूचीं सपुनर्नवां॥ शुकनासां हरिद्रे द्वे रास्नां मेदां शतावरीं। कल्कीकृत्य घृतप्रस्थं पचेत्क्षीरे
चतुर्गुणे। तत्सिद्धं पाययेन्नारीं योनिशूलनिपीडितां। सा पीडिता चलिता या च निःसृता विवृता च या। पित्तयोनिश्च विभ्रांता षं
ढयोनिश्च या स्मृता। प्रपद्यंते हि ताः स्थानं गर्भं गृह्णंति चासकृत्। एतत्फलघृतं नाम योनिदोषहरं परं। फलघृतं॥ ॥इ
ति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने घृतकल्पनाध्यायः॥ ९॥ अथ तैलानि॥ लाक्षा
ढकं क्वाथयित्वा जलस्य चतुराढके। चतुर्थांशं शृतं नीत्वा तैलप्रस्थं विनिक्षिपेत्। मस्त्वाढकं च गोदध्नस्तत्रैव विनियोज
येत्। शतपुष्पाश्वगंधा हरिद्रे देवदारु च। कटुका रेणुकं मूर्वा कुष्ठं च मधुयष्टिकं। चंदनं मुस्तकं रास्ना पृथक्कर्षप्रमा शा.म.
णतः। चूर्णयेत्तत्र निक्षिप्य साधयेन्मृदुवह्निना। अस्याभ्यंगात्प्रणश्यंति सर्वेऽपि विषमज्वराः। कासश्वासप्रतिश्यायाश्चि २८

कपृष्ठग्रहास्तथा। वातपित्तमपस्मारमुन्मादं यक्ष्मरोगं समानान्॥ कंडूं शूलं च दौर्गंध्यं गात्राणां स्फुटनं जयेत्॥ पुष्टिं गर्भं समेवेद्दस्य गर्भि
ण्यःसंगतो मंत्री॥ लाक्षाद्यं तैलम्॥ ॥अश्वगंधां बलां विल्वं पाटलां बृहती द्वयं। श्वदंष्ट्रातिबलानिंबा नरणो नाकं च पुनर्नवां प्रसा
रिणीमग्निमंथं कुर्याद्दशपलं पृथक्। चतुर्द्रोणेन जले पक्त्वा पादशेषं शृतं नयेत्। तैलाढकेन संयोज्य शतावर्यारसाढकं। क्षिपेत्त्र
च गोक्षीरं तैलात्तस्माच्चतुर्गुणं। शनैर्विपाचयेद्देभिः कल्कैर्द्विपलिकैः पृथक्। कुष्ठैलाचंदनवचामांसीशैलेयसैंधवैः। अश्वगंधा
बलारास्नाशतपुष्पैंद्रदारुभिः। पर्णी चतुष्टयेनैव तगरेण च साधयेत्। तत्तैलं नावनेऽभ्यंगे पाने बस्तौ च योजयेत्। पक्षाघाते हनुस्तंभे
मन्यास्तंभे गलग्रहे। कुब्जत्वे बधिरत्वे च गतिभंगे कटीग्रहे। गात्रशोषे द्रियध्वंसे नष्टशुक्रे ज्वरक्षये। अंत्रवृद्धिं कुरंडं च दंतरोगं शि
रोग्रहे। पार्श्वशूले च पांगुल्ये बुद्धिहानौ च गृध्रसी। अन्यांश्च विषमान्वातान्नुयेत्सर्वान्दुःसंश्रयान्। अस्य प्रभावाद्वंध्यापि नारी पुत्रं प्रसूय
ते। मर्त्यो गजो वा तुरगो तैलादस्मात्सुखी भवेत्। यथा नारायणो देवो दुष्टदैत्य विदैत्य विनाशनः। तथेदं वातरोगाणां नाशनं तैलमुत्तमम्
॥ नारायणतैलं॥ बलामूलकषायेन दशमूलरसेन वा। कुलत्थयवकोलानां क्वाथेन पयसा तथा। अष्टाष्टभागयुक्तेन भागमेकं च
तैलतः। गणेन जीवनीयेन शतावर्यैन्द्रवारुणी। मंजिष्ठाकुष्ठशैलेयतगरागुरुसैंधवैः। वचापुनर्नवामांसीसारिवाद्वयपत्रकैः। जातपुष्पा
श्वगंधाभ्यां मेलपाच्य विपाचयेत्। पादशिष्टः शृतो ग्राह्यस्तैले दधि च तत्समं। कांजिकं च समं तेन क्षीरं तैलाच्चतुर्गुणं। तैलात्तथाष्टमां
शेन सर्वकल्कानि योजयेत्। मधुकं पिप्पलीमूलं चित्रकः सैंधवं वचा। प्रसारणी देवदारु रास्ना च गजपिप्पली। भल्लातकः शतपुष्पा च मांसी

~ल्नेर

शार्ङ्ग॰ चेत्सर्पिर्विपाचयेत।एतत्तैलवरं पक्वं वातश्लेष्मामयान्जयेत।कौब्जं खंजत्वं पंगुत्वं गृध्रसी मर्दितं तथा।हनुपृष्ठशिरोग्रीवाकटिस्तंभं चनाश
२८ येत।अन्यांश्च विषमान्वातान्सर्वान्नाशु व्यपोहति॥प्रसारणी तैलं॥माषा यवाः तसी कुष्ठमर्कटी च कुरुंटकं।गोकंटं तुंडुकश्योणां कुर्या
त्समपलं पृथक्।चतुर्गुणांबुनापक्त्वा पादशेषं शृतं नयेत।कार्पासकास्थिबदरं शणबीजं कुलत्थकं।पृथक्चतुष्पलं चतुर्गुणेज
ले पचेत।चतुर्थांशावशिष्टं च गृहीयात्क्वाथमुत्तमं।प्रस्थैकं छागमांसस्य चतुःषष्टिपले जले॥निःक्षिप्य पाचयेद्धीमान्पादशेषं रसं नये
त।तैलप्रस्थं ततः क्वाथान्सर्वानेतान्विनिःक्षिपेत॥कल्कैरेभिश्च विपचेद्दमताम्रनागरैः॥रास्नापुनर्नवैरंडैः पिप्पल्या शतपुष्पया।ब
ला प्रसारणी मांचमांस्या कटुकया तथा।पृथगर्द्धपलैरेतैः साधयेन्मृदुवन्हिना।हन्यात्तैलमिदं शीघ्रं ग्रीवास्तंभावबाहुकौ।अर्द्दि
तं शोषमान्द्यं पंगुत्वं मापतानकौ।शाखाकंपं शिरःकंपं विश्वाचीमर्दितं तथा।मासादिकमिदं तैलं सर्ववातविकारनुत॥माषतैलं॥
शतावरी बलापुत्रंमपर्णी गंधर्वहस्तकः॥अश्वगंधाश्वदंष्ट्रा च बिल्वकासः कुरंटकः।एषां मर्द्धपलान्भागान्कल्पयेच्च विपाचयेत।चतुर्गुणेन
नीरेण पादशेषं शृतं नयेत।तिलोद्भवतैलप्रस्थेन क्षीरप्रस्थं विनिःक्षिपेत।शतावरीदेवदारुमांसीतगरचंदनं।शतपुष्पा बला कुष्ठमेल
शैलेयमुस्तलं।ऋद्धिर्मेधा च मधुकं काकोली जीवकस्तथा।एषां कर्षसमैः कल्कैस्तैलं गोमयवन्हिना।पचेत्तत्सिद्धतैलेन नरः स्त्रीषु
वृषायते।नारी च लभते पुत्रं योनिशूलं च नश्यति।अंगशूलं शिरःशूलं कामलां पांडुरोगतां।गृध्रसीं प्लीहशोथं च श्लेष्मप्रहाणं दंडाप श॰म॰
तानकं।महाहं वातरक्तं च वातपित्तगदार्दितं।अश्मरीं तथाध्मानेरक्तपित्तं नियच्छति।शतावरी तैलमिदं कृष्णात्रेयेण भाषितं॥ २८

॥ॐ नातपर्णीये स्वाहा॥ उत्तराभिमुखो भूत्वा खनेतद्विरञ्जकृन॥ ॐ सर्वव्याधिनाशनीये स्वाहा॥ इत्युत्पाटनमंत्रः॥ ॐ कुमा
रजीवनीये स्वाहेति पाचनमंत्रः॥ शतावरी दिव्यौषध्याः॥ शतावरीतैलं। कासीसं लांगली कुष्ठं शुंठी कृष्णा च सैंधवं। मनःशिला
श्वमारश्च विडंगानि च लोध्रकः। दंतीकोशातकीबीजं हेमाह्वा हरितालकः। कल्कैः कर्षमितैस्तैलं ततः प्रस्थं विपाचयेत्। स्नुह्य
र्कपयसी दद्यात् पृथक् द्विपलसंमिते। चतुर्गुणं गवां मूत्रं दत्वा सम्यक् प्रसाधयेत्। कथितं खरनादेन तैलमर्शो विनाशनं। सा
रवत्स्वातपत्येत दर्वी स्पर्शं गतो भृशं। वलिं न दृषपत्येते तस्मा रक्तमकरं स्मृतं। कासीसाद्यं तैलं॥ मंजिष्ठा सारिवा सर्जयष्टी शि
कैः पलोन्मितैः। पिंडाख्यं साधयेत्तैलमभ्यंगाद्वातरक्तनुत्। पिंडतैलं। अर्कपत्ररसे पक्वं हरिद्राकल्कसंयुतं। नाशयेत् सार्षपं तैलं
माःसालकच्छू विचर्चिकां। अर्कतैलं॥ मरिचं हरितालं च त्रिवृतं रक्तचंदनं। मुस्तं मनःशिलां मांसी द्वे निशे देवदारु च। विशालां
करवीरं च कुष्ठमर्कपयस्तथा। तथैव गोमयरसं कुर्यात् कर्षमितान् पृथक्। विषं चार्द्धपलं देयं प्रस्थं च कटुतैलकं। गोमूत्रं द्विगुणं द
त्वा जलं च द्विगुणं भवेत्। मरिचाद्यमिदं तैलं श्वित्रकुष्ठप्रणाशनं। जयेत् श्वित्राणि सर्वाणि पुंडरीकं विचर्चिकां। पामां सिध्मानि लमि
कां ददूं कंडूं प्रणाशयेत्। मरिचाद्यं तैलं॥ त्रिफलारिष्टमं निंबद्वे निशे रक्तचंदनं। एतैः सिद्धमरुष्काणां तैलमभ्यंजने हितं। त्रैफलं तै
लं॥ भावयेत् त्रिंशद्बीजानि भृंगराजरसेन च। तथा सनस्यतो येन तत्तैलं हंति नस्यतः। अकालपलितं सद्यः पुंसां दुग्धान्नभोजिनां।
।निम्बबीजतैलं॥ करंजश्वित्रको जातीकरवीरस्य पाचितं। तैलमेभिर्द्रुतं हन्याद्दुष्टव्रणादि दुष्टमकां॥ करंजाद्यं तैलं॥ नीलिका

शार्ङ्ग० केतकीकंदं भृंगराजं कुरंटकः।तथार्जुनस्य पुष्पाणि बीजकाः कुसुमान्यपि।रात्र्यातिलाश्च तगरं समूलं कमलं तथा।प्रयोरङ्गप्रियं
३० गुंजाश्चापि मलयगुडूचिका।त्रिफलापद्मपंकस्थकल्कैरेभिः पृथक्पृथक्।कर्षमानैः पचेत्तैलं त्रिफलाक्वाथसंयुतं।भृंगराजरसेनैव
सिद्धं केशस्थिरीकृतम्।अकालपलितं हन्ति दारुणं चोपजिह्विकां।नीलिकाद्यं तैलं।भृंगराजरसेनैव लोहकिट्टं फलत्रिकं।सारिवा च प-
चैव कल्कैस्तैलं हरेण नाशनं।अकालपलितं कंडूं सिद्धलुप्तं च नाशयेत्।भृंगराजतैलं॥इरिमेदत्वचं क्षुण्णां पचेच्छतपलोन्मितां॥जल-
द्रोणेन ततः क्वाथं गृहीत्वा त्वाहरेत्पितं।तैलप्रस्थं ढकं दत्वा कल्कैः कर्षमितैः पचेत्।इरिमेदत्वचं गात्रगैरिकागरुपद्मकैः।मंजिष्ठा-
लोध्रमधुकैः लाक्षान्यग्रोधमुस्तकैः।लवंगजातीफलकर्पूरकंकोलखदिरैस्तथा।पतंगधातकीपुष्पसूक्ष्मैलानागकेसरैः।कट्फ-
लेन च समं सिद्धं तैलं मुखरुजं जयेत्।प्रदुष्टमांसं चलितं जीर्णदंतं च सौषिरं।शीतादं दंतहर्षं च विद्रधिं कृमिदंतकं।दंतस्फुटनदौ-
र्गंध्यं जिह्वाताल्वोष्ठजां रुजं॥इरिमेदाद्यं तैलं॥हिंगुतुंबुरुशुंठीभिः कटुतैलं विपाचयेत्॥तस्य पूरणमात्रेण कर्णशूलं प्र-
णश्यति।हिंग्वाद्यं तैलं।बालबिल्वानि गोमूत्रे पिष्ट्वा तैलं विपाचयेत्।साजक्षीरं च नारं च बाधिर्ये कर्णपूरणं।बिल्वतैलं
।बालमूलकशुंठीनां क्षारः क्षारपदं तथा।लवणानि च पंचैव हिंगु शिग्रुमहौषधं।देवदारुवचाकुष्ठं शतपुष्पा रसांजनं।ग्रं-
थिकं भद्रमुस्तं च कल्कैः कर्षमितैः पृथक्।तैलप्रस्थं च विपचेत्कदलीबीजपूरयोः।रसाभ्यां मधुशुक्तेन चातुर्गुण्यमिते- शा०सं०
न च।एषपलावं कर्णानां दृशूले बधिरताकृमी नाश्ननां स्थकर्णजान रोगान्मुखरोगांश्च नाशयेत्।जंबीराणां फलरसं ३०

प्रस्थैकं कुडवोन्मितं। माहिकं तत्र दातव्यं पलैकं पिप्पलीकृतं। एतदेकीकृतं सर्वं मधुभांडे तु धापयेत्। धान्यराशौ स्थितं मासं मधुशुक्तमु
दाहृतं। मधुशुक्तविधानेनारतैलं॥ पाठाद्वे च निशे मूर्वा पिप्पली जातिपल्लवैः॥ दंत्या च तैलं संसिद्धं नस्यं दुष्टपीनसे। पाठाद्यं तैलं।
कुष्ठं बिल्वकणाशुंठी द्राक्षा कल्ककषायवत्। साधितं तैलमाज्यं वा नस्यात्क्षवथुनाशनं। कुष्ठाद्यं तैलं। व्याघ्रीदंतीवचाशिग्रुसु
लसीव्योषसैंधवैः। कफस्य पाचनं तैलं पूतिनासागदापहं। व्याघ्रीतैलं। गृहधूमकणादारुक्षारनक्ताह्वसैंधवैः। सिद्धं शिखरिबी
जैश्च तैलं नासार्शसां हितं॥ गृहधूमतैलं। वज्रीक्षीरं रविक्षीरं द्रवेधत्तूरपत्रजं। महिषीविड्द्रवं सर्वं त्वांतिलतैलकं। पचेत्तैलावशेषं
च गोमूत्रे च चतुर्गुणे। तैलावशेषं पक्वं च तत्तैलं प्रस्थमात्रकं। गंधकाग्निशिलातालं विडंगातिविषाविषं। तिक्ताकोशात
कीकुष्ठवचामांसीकटुत्रयं। पीतदारु च यष्ट्याह्वं लज्जिकाद्वारजीरकं॥ देवदारु च कर्षांशं चूर्णं तैले विमिश्रयेत्। वज्र
तैलमिदं ख्यातमभ्यंगात्सर्वकुष्ठनुत्॥ वज्रतैलं॥ करवीरशिखादंतीलवृक्षकोशातकीफलं। रंभाहाराद्वकैस्तैलं प्रशस्तं लोमशात
नं। करवीरादितैलं॥ ॥ इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने तैलकल्पनाध्यायः १२
॥ ॥ द्रवेषु चिरकालस्थं द्रव्यं यत्संहितं भवेत्। आसवारिष्टभेदैस्तत्प्रोच्यते भेषजोचितं। यदपक्वौषधांबुभ्यां सिद्धं मद्यं स आ
सवः स्मृतः। अरिष्टं क्वाथसिद्धं स्यात्तयोर्मानं पलोन्मितं। अनुक्तमाने रिष्टेषु द्रवाद्द्रोणं गुडात्तुलां। क्षौद्रं क्षिपेद्गुडादर्द्धं प्रक्षेपं द्रव्य
मांशिकं मतं। यथा सीतरसः सीधुः पक्वमधुरद्रवैः। सिद्धः पक्वरसः सीधुः संपक्वमधुरद्रवैः। सिद्धः पक्वरसः सीधुः संपक्वमधुर

शा॰ई॰ द्रवैः। परिपक्वान्नसंधानसमुत्पन्नां सुरां जगुः। सुरामंडः प्रसन्ना स्यात्ततः कादंबरी घना। तदधो जगलो ज्ञेयो मेदको जगलाद् घनः।
३१ बक्कसो हृतसारः स्यात्सुराबीजं च किण्वकं। यत्तालखर्जूररसैः संहिता सा हि वारुणी। कंदमूलफलादीनि सस्नेहलवणानि चाय
त्र द्रवे ऽभिषूयंते तत्शुक्तमभिधीयते। विनष्टमम्लतां यातं मद्यं वा मधुरद्रवः। विनष्टः संहितो यस्तु तच्चुक्रमभिधीयते। गुडांबुना सतै
लेन कंदशाकफलैस्तथा। संधितं चाम्लतां यातं गुडशुक्तं प्रचक्षते। एवमेवेक्षुशुक्तं स्यान्मृद्वीकासंभवं तथा। तुषांबु संहितं
ज्ञेयमामैर्विदलितैर्यवैः। यवैस्तु निस्तुषैः पक्वैः सौवीरं संधितं भवेत्। कुल्माषधान्यमंडादिसंहितं कांजिकं विदुः। शंडाकी संधि
ता ज्ञेया मूलकैः सर्षपादिभिः। अथ पत्रासवाः। उशीरं वालकं पद्मं काश्मरी नीलमुत्पलं। प्रियंगुर्पद्मकं लोध्रं मंजिष्ठा धन्व
यासकं। पाठा किराततिक्तं च न्यग्रोधोदुंबरं शटी। पर्पटं पुंडरीकं च पटोलं कांचनारकं। जंबूशाल्मलिनिर्यासं प्रत्येकं पलसंमि
तान्। भागान्सुचूर्णितान् कृत्वा द्राक्षायाः पलविंशतिः। धातकी षोडशपलं जलद्रोणद्वये क्षिपेत्। शर्करायास्तुलां दत्वा क्षौद्रस्यै
कतुलां तथा। मासं व्यवस्थापयेद्भांडे मांसीमरिचधूपिते। उशीरासव इत्येष रक्तपित्तनिवारणः। पांडुकुष्ठप्रमेहार्शः कृमि
शोथहरस्तथा। उशीरासवः। पिप्पली मरिचं चव्यं हरिद्रे चित्रको घनः। विडंगः क्रमुको लोध्रः पाठा धात्र्येलवालुकं। उशी
रं चंदनं कुष्ठं लवंगं तगरं तथा। मांसी त्वगेला पत्रं च प्रियंगुर्नागकेसरं। एषामर्द्धपलान् भागान् सूक्ष्मचूर्णीकृतान् शुभान्।
जलद्रोणद्वये क्षिप्त्वा दद्याद्गुडतुलात्रयं। पलानि दश धातक्या द्राक्षा षष्टिपला भवेत्। एतान्येकत्र संयोज्य मृद्भांडे च विनिक्षि रामः ३१

पेताज्ञालाजान्तरसंसर्पेपायपेद्दृष्मपेहृया। हृयं गुल्मोदरंकार्श्यं ग्रहणीं पांडुतां तथा। अर्शांसि नाशयेन्नीघ्रं पिप्पल्याद्यासवः क्व
थं। पिप्पल्याद्यासवः॥ लोहचूर्णं त्रिकटुकं त्रिफलां च यवानिकां। विडंगं मुस्तकं चित्रं चतुःसंख्योपलं पृथक्। चूर्णीकृत्य ततः क्षौद्रं च
तुःषष्टिपलं क्षिपेत्॥ द्राक्षाद्वादशतुलां तत्र जलद्रोणद्वयं तथा। घृतभांडे विनिक्षिप्य निदध्यान्मासमात्रकं। लोहासवममुं मर्त्यः पि
बेद्वह्निकरं परं। पांडुश्वयथुगुल्मानि जठराण्यर्शसां रुजां। कुष्ठं प्लीहामयं कंडूं कासं श्वासं भगंदरं। अरोचकं च ग्रहणीं हृद्रोगं च विना
शयेत्॥ लोहासवः॥ अथारिष्टः॥ तुलां कुटजमूलस्य मृद्वीकार्द्धतुलां तथा। मधूकपुष्पकाश्मर्यभागान्दशपलोन्मितान्। चतुर्द्रोणेंऽभ
थ९ सः पक्त्वा क्वाथे द्रोणावशेषिते॥ धातक्या विंशतिपलं गुडस्य च तुलां क्षिपेत्। मासमात्रं स्थितो भांडे कुटजारिष्टसंज्ञितः। ज्वरान्शमयेत्स
र्वान् कुर्यात्तीक्ष्णं धनंजयं। कुटजारिष्टः॥ विडंगं ग्रंथिकं रास्ना कुटजत्वक्फलानि च। पाठैलवालुकं धात्रीभागांश्च पलान्पृथक्।
अष्टद्रोणेंऽभसः पक्त्वा कुर्याद्द्रोणावशेषितं। पूते शीते क्षिपेत्तत्र क्षौद्रं पलशतत्रयं। धातकीं विंशतिपलं त्रिजातं द्विपलं तथा। प्रियंगु
कांचनाराणां मलोध्राणां पलं पलं। व्योषस्य च पलान्यष्टौ चूर्णीकृत्य प्रदापयेत्। घृतभांडे विनिक्षिप्य मासमेकं विधारयेत्। ततः पि
बेद्यथार्हं तु जयेद्विद्रधिमुत्थितं। ऊरुस्तंभमश्मरीं मेहान्प्रत्यष्ठीलाभगंदरान्। गंडमालां हनुस्तंभं विडंगारिष्टसंज्ञितः॥ विडंगारिष्टः
॥ तुलार्द्धं देवदारुस्य द्वासकास्य पलविंशतिः। मंजिष्ठेंद्रयवौ दंतीं तगरं रजनीद्वयं। रास्नाकृमिघ्नं मुस्तं च शिरीषं खदिरार्जुनौ। भागान्द
पलान्द्याद्यवान्या वत्सकस्य च। चंदनस्य गुडूच्याश्च रोहिण्याश्चित्रकस्य च। भागानष्टपलानेतानष्टद्रोणेंऽभसः पचेत्। द्रोणशेषेक

शा ई॰ आयेच्च पक्ते शीते प्रदापयेत्। धातक्याः षोडशपलं माक्षिकस्य पलत्रयं। ओषधस्य द्विपलं दद्यात्त्रिजातात्तु चतुःपलां चतुःपलं प्रियंगोश्च
३२ द्विपलं नागकेशरात्। सर्वाण्येतानि संचूर्ण्य घृतभांडे विधारयेत्। मासमात्रं पिबेदेनं प्रमेहं हन्ति दुर्जयं। वातरोगानयं हन्यात्सर्वान्मूत्र
कृच्छ्राणि नाशयेत्॥ देवदार्व्यादिकोरिष्टो दद्रुकुष्ठविनाशनः। देवदार्व्यारिष्टः॥ खदिरस्यात्तुलार्द्धं तु देवदारु च तत्समं। बाकुची द्वा
दशपला दार्व्याः पलविंशतिः। त्रिफला विंशतिपला त्वष्टद्रोणेंऽभसः पचेत्। कषाये द्रोणशेषे च पूते शीते विनिःक्षिपेत्। तुलाद्वयं
माक्षिकस्य तुलैका शर्करा मता। धातक्या विंशतिपलं कंकोलं नागकेशरम्। जातीफलं लवंगैलात्वक्पत्राणि पृथक्पृथक्। प
लोन्मितानि कृष्णापादघासल चतुष्टयं। घृतभांडे विनिक्षिप्य मासमात्रं पिबेन्नरः। महाकुष्ठानि हृद्रोगं पांडुरोगार्बुदं तथा।
गुल्मं ग्रंथिं कृमिं कासं तथा प्लीहोदरं जयेत्। एष वै खदिरारिष्टः सर्वकुष्ठनिवारणः। खदिरारिष्टः। तुलाद्वयं तु बब्बुलाच्चतु
द्रोणे जले पचेत्। द्रोणशेषे रसे शीते गुडस्य त्रितुलां क्षिपेत्। धातकीं षोडशपलां कृष्णां च द्विपलोन्मितां॥ जातीफलानि कंकोल
मेलात्वक्पत्रकेसरं। लवंगं मरिचं चैव पलिकान्युपकल्पयेत्। मासं भांडे स्थितस्त्वेष बब्बूलारिष्टको जयेत्। क्षयं कुष्ठमतीसारं प्रमे
हं श्वासकासकान्॥ बब्बूलारिष्टः॥ द्राक्षातुलार्द्धं द्विद्रोणे जलस्य विपचेत्सुधीः। पादशेषे कषाये च पूते शीते विनिःक्षिपेत्। गुडस्य द्वि
तुलां तत्र त्वगेलापत्रकेसरं। प्रियंगुमरिचं कृष्णा विडंगं चेति चूर्णयेत्। पृथक्पलोन्मितैर्भागैस्ततो भांडे निधापयेत्। स्थापयित्वा
ततो मासं पिबेज्जातरसं ततः। उरःक्षतं क्षयं हंति कासश्वासगलामयान्। द्राक्षारिष्टाह्वयः प्रोक्तो बलकृन्मलशोधनः॥ द्राक्षारि
शा॰म॰ ३२

ष्ट्वा रोहीतकतुलामेकां चतुर्द्रोणे जले पचेत्। पादशेषे रसे पूते शीते पलशतद्वयं। दद्याद्गुडस्य धातक्याः पलषोडशिका मता। पंचकोलं
त्रिजातं च त्रिफलां च विनिक्षिपेत्। चूर्णयित्वा पलांशेन ततो भांडे निधापयेत्। मासादूर्ध्वं च पिबतां ग्रहजायांतिमं स्वयं॥ ग्रहणीपांडु
हृद्रोगं प्लीहगुल्मोदराणि च। कुष्ठशोफारुचिहरो रोहितारिष्टसंज्ञितः॥ रोहितकारिष्टः॥ पर्पटो हस्ती गोकंटो बिल्वोऽग्निमंथनोरु
लुः॥ पाटला कश्मरी चेति दशमूलमिहोच्यते॥ दशमूलानि कुर्वीत भागैः पंचपलैः पृथक्। पंचविंशत्पलं कुर्याच्चित्रकं पौष्क
रं तथा। कुर्याद्विंशत्पलं लोध्रं गुडूचीं तत्समां भवेत्। पलैः षोडशभिर्धात्री त्रयोविंशत्युरालभा। खदिरो बीजसारश्च पथ्या चेति पृ
थक् पलैः। अष्टभिर्गुणिता कुष्ठं मंजिष्ठा देवदारु च। विडंगं मधुकं धात्री कपित्थोऽक्षः पुनर्नवा। चव्यं मांसी प्रियंगुश्च सारिवा कृष्ण
जीरकं। त्रिवृत्ता रेणुकं रास्ना पिप्पली क्रमुकः शटी। हरिद्रा शतपुष्पा च पद्मकं नागकेशरं। मुस्तमिंद्रयवः शृंगी जीवकर्षभकौ त
था। मेदा चान्या महामेदा काकोल्यौ ऋद्धिवृद्धिके। कुर्यात्पृथक् द्विपलिकान्यष्टगुणे जले। चतुर्थांशं शृतं नीत्वा मृद्भांडे स
न्निधापयेत्। ततः पचेत्पलं द्राक्षां पचेन्नीरे चतुर्गुणे। त्रिपादशेषं शीतं च पूर्वक्वाथे प्रपूतं तं क्षिपेत्। द्वात्रिंशत्पलिकं दौद्रं दद्याद्गुडचतुः
शतं। त्रिंशत्पलानि धातक्याः कंकोलं जलचंदनं। जातीफलं लवंगं च त्वगेलापत्रकेशरं। पिप्पली चेति संचूर्ण्य भागैर्द्विपलिकैः
पृथक्। शाणमात्रां च कस्तूरीं सर्वमेकत्र निक्षिपेत्। भूमौ निखातयेद्भांडं ततो जातरसं पिबेत्। कतकस्य फलं क्षिप्त्वा रसं निर्मलं
तां नयेत्॥ ग्रहणीमरुचिं शूलं श्वासकासभगंदरान्॥ वातव्याधिं क्षयं छर्दिं पांडुरोगं च कामलां। कुष्ठान्यर्शांसि मेहांश्च मंदाग्नि

शार्ङ् मुख्याणि चान्यार्के रामकमरी मन्त्रं कुष्ठं धातुद्वयं जयेत्॥ कुष्ठानां पुष्टिजननो वंध्यानां पुत्रदः परः। अग्निदो दन्तमलाभ्येस्तेजःस्तु
३३ कबलप्रदः। हेमाभ्राशिक्तः॥ ॥इति श्रीहरमेश्वरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थानेऽम्रासवाजिक
रसनाध्यायः॥ १४ ॥ अथ धातुशोधनम्॥ स्वर्णं तारं ताम्ररीति नागवङ्गौ च तीक्ष्णकं। धातवः सप्त विज्ञेयास्ततस्ताञ्छोधयेद्बुधः। स्वर्णतारार
ताम्राणां पत्राण्यग्नौ प्रतापयेत्। निषिंचेत्तप्ततप्तानि तैले तक्रे च कांजिके। गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा। एवं स्वर्णादि
लोहानां विशुद्धिः संप्रजायते। नागवंगौ प्रतप्तौ च गालितौ तौ निषेचयेत्। त्रिधा त्रिधा विशुद्धिः स्याद्रविदुग्धेन च त्रिधा॥ अथ धातुव
र्गस्य मारणम्॥ स्वर्णस्य द्विगुणं सूतमम्लेन सह मर्दयेत्। तद्गोलकसमं गंधं निदध्यादधरोत्तरम्। गोलकं च ततो रुद्ध्वा शरावदृ
ढसंपुटे। त्रिंशद्वनोपलैर्दद्यात्पुटान्येवं चतुर्दश। निरुत्थं जायते भस्म गंधो देयः पुनः पुनः॥ अथापरो विधिः॥ कांचने गालिते नागं
षोडशांशेन निक्षिपेत्। चूर्णयित्वा तथाम्लेन घृष्ट्वा कृत्वा तु गोलकम्। गोलकेन समं गन्धं दत्वा चैवाधरोत्तरम्। शरावसंपुटे धृत्वा
पुटेत्त्रिंशद्वनोपलैः। एवं सप्तपुटैर्हेम निरुत्थं भस्म जायते॥ अथ रूप्य॥ कांचनारिरसैर्घृष्ट्वा समसूतकगन्धयोः। कज्जल्या हेमपत्रा
णि लेपयेत्समया तया। कांचनारित्वचः कल्कं मूषायुग्मं प्रकल्पयेत्। धृत्वा तत्संपुटे गोलं मृन्मूषायां संपुटेत्ततः। निधाय संधि
रोधं च कृत्वा संशोष्य गोलकम्। वह्निं खरतरं कुर्यादेवं दद्यात्पुटत्रयम्। निरुत्थं जायते भस्म सर्वकार्येषु योजयेत्। कांचनारिप्रका शा०सं०
रेणालाङ्गली हन्ति कांचनम्। ज्वालामुखी तथा हन्यात्तथा हंति मनःशिला। शिलासिंदूरयोश्चूर्णं समयोरर्कदुग्धकैः। सप्तधा भावना ३३

दद्याच्छोषयेत्पुनः पुनः। ततस्तु गलिते हेम्नि कल्कोऽयं दीयते समः। पुनर्ध्मे हृते तत्र पश्चात्कल्को विलीयते। एवं वेलात्रयं दद्यात्कल्कं हेमसम
तिर्भवेत्॥ ॥तथाच॥ पारावतमलैर्लिंपेद्यवाकुक्कुटाण्डद्रवैः। हेमपत्राणि तेषां च प्रदद्यादन्तरान्तरा। गन्धकं तोलमेकं कृत्वा शरावसंपुटे॥ प्र
दद्यात्कुक्कुटपुटं पञ्चविंशतिगोमयोपलैः। एवं नवपुटं दद्याद्दशमं च महापुटं। त्रिंशद्वनोपलैर्देयं जायते हेमभस्म तत्॥ ॥अथ तारमारणम्॥ भा
गैकं तालकं मर्द्यं याममम्लेन केनचित्। तेन मात्रायं तारपत्राणि परिलेपयेत्। धृत्वा मल्लपुटे रुध्वा पुटेत्त्रिंशद्वनोपलैः। समुद्धृत्य पुनस्ता
लं दत्वा रुध्वा पुटे पचेत्। एवं चतुर्दशपुटैस्तारं भस्म प्रजायते॥ ॥अन्यच्च॥ स्नुहीक्षीरेण संपिष्टं माक्षिकं तेन लेपयेत्। तालकस्य प्रकारेण तारपत्राणि
बुद्धिमान्। पुटेच्चतुर्दशपुटैस्तारं भस्म प्रजायते॥ ॥अथ ताम्रमारणम्॥ सूक्ष्माणि ताम्रपत्राणि कृत्वा संस्वेदयेद्बुधः। वासरत्रयमम्लेन ततः ख
ल्वे विनिक्षिपेत्। पादांशं सूतकं दत्वा याममम्लेन मर्दयेत्। ततस्तु ताम्रपत्राणि लेपयेद्द्विगुणेन च। गन्धकेनाम्लघृष्टेन ततः कुर्याच्च गोलकं।
ततः पिष्ट्वा च मीनाक्षीं चाङ्गेरीं वा पुनर्नवां। मातकल्केन वहिर्गोलं लेपयेदङ्गुलोन्मितं। धृत्वा तद्गोलकं भाण्डे शरावेण च रोधयेत्। वालु
काभिः प्रपूर्याथ विभृतिलवणाम्बुभिः। दत्वा भाण्डमुखे मुद्रां ततश्चुल्ल्यां विपाचयेत्। क्रमवृद्ध्याग्निना सम्यक्कुर्याद्यामचतुष्टयम्। स्वा
ङ्गशीते समुद्धृत्य स्मतं ताम्रं शुभं भवेत्। स्वाङ्गशीते समुद्धृत्य मर्दयेच्छूरणद्रवैः। यामैकं गोलकं तस्य निक्षिपेच्छूरणोदरे। मृदालेपस्तु
कर्त्तव्यः सर्वतोऽङ्गुष्ठमात्रकः। पाच्यं गजपुटे क्षिप्त्वा मृतं भवति शोभनम्। वान्तिभ्रान्तिक्लमं रेकं न करोति कदाचन॥ अथ नागमार
णम्॥ अर्कक्षीरेण संपिष्टो गन्धकस्तेन लेपयेत्। समेन नागपत्राणि शुद्धान्यम्लद्रवैर्मुहुः। ततो मूषापुटे ध्मात्वा पचेद्गजपुटेन च। ए
वं पुटद्वयेनैव भस्मसारं भवति ध्रुवम्॥ आरवल्कास्यमप्याशु भस्मतां याति निश्चितं। अर्कक्षीरं वटाजं स्यात्क्षीरं त्रिगुणिका तथा। ता

स्त्रीति ध्वनिवधे सम गन्धकयोगतः ॥ ॥ अथ नागमारणम् ॥ तांबूलीरससंपिष्टशिलालेपात्पुनः पुनः ॥ द्वात्रिंशद्भिः पुटैर्नागो
निरुत्थो याति भस्मतां ॥ अन्यच्च ॥ अश्वत्थचिंचात्वक्चूर्णं चतुर्थांशेन निक्षिपेत् ॥ मृत्पात्रे विद्रुते नागे लोहदर्व्या प्रचालितः ॥ यामै-
केन भवेद्भस्म तत्तुल्यां मनःशिलां ॥ कांजिकेन द्वयं पिष्ट्वा पचेद्गजपुटेन च ॥ स्वांगशीतं पुनः पिष्ट्वा शिलया कांजिकेन च ॥
पुनः पुटेत्त्रयावाभ्यामेवं षष्टिपुटैर्मृतिः ॥ ॥ अथ वंगमारणम् ॥ ॥ मृत्पात्रे द्राविते वंगे चिंचाश्वत्थत्वचो रजः ॥ क्षिप्त्वा
क्षिप्त्वा चतुर्थांशमयोदर्व्या प्रचालयेत् ॥ ततो द्वियाममात्रेण वंगं भस्म प्रजायते ॥ अथ भस्मसमं तालं क्षिप्त्वाम्लेन मर्दयेत् ॥ ततो ग-
जपुटे पक्त्वा पुनरम्लेन मर्दयेत् ॥ तालेन दशमांशेन याममेकं ततः पुटेत् ॥ एवं दशपुटैः पक्वं वंगं संम्रियते ध्रुवम् ॥ अथ लोहमारणम् ॥ ~स्तो ५
शुद्धं लोहभवं चूर्णं पातालगरुडीरसैः ॥ मर्दयित्वा पुटेद्वह्नौ दद्यादेवं पुटत्रयं ॥ पुटत्रयं कुमार्याश्च कुठारच्छिन्नकारसैः ॥ पुटषट्कं ततो दद्या-
देवं तीक्ष्णमृतिर्भवेत् ॥ अन्यच्च ॥ क्षिपेद्द्वादशमांशेन दरदं तीक्ष्णचूर्णतः ॥ मर्दयेत्कन्यकाद्रावैर्याममेकं ततः पुटेत् ॥ एवं सप्तपुटैर्मृ-
तं लोहचूर्णं भवात्पुटात् ॥ रसैः कुठारच्छिन्नायाः पातालगरुडीरसैः ॥ स्तन्येन चार्कदुग्धेन तीक्ष्णस्यैवं मृतिर्भवेत् ॥ अन्यदपि ॥
सूतकाद्द्विगुणं गन्धं दत्त्वा कुर्याच्च कज्जलीं ॥ द्वयोः समं लोहचूर्णं मर्दयेत्कन्यकाद्रवैः ॥ याममेकं ततः पिण्डं कृत्वा ताम्रस्य पा-
त्रके ॥ घर्मे धृत्वा हरुकस्य पत्रैराच्छादयेद्बुधः ॥ यामार्द्धेनोष्णता तोयाद्धान्यराशौ न्यसेत्ततः ॥ दत्त्वोपरि शरावं तु त्रिदिनान्ते समुद्ध-
रेत् ॥ पिष्ट्वा च गालयेद्वस्त्रादेवं वारितरं भवेत् ॥ एवं सर्वाणि लोहानि स्वर्णादीन्यपि मारयेत् ॥ शिलागन्धार्कदुग्धाक्ताः स्वर्णाद्या

४८२

सर्वधातवः। म्रियन्ते द्वादश पुटैः सत्यं गुरुवचो यथा॥ ॥अथोपधातुशोधनमारणम्॥ माक्षिके तुत्थकाभ्रौ च नीलाञ्जन शिलाल
काः॥ रसकश्चेति विज्ञेया एते सप्तोपधातवः॥ अथ स्वर्णमाक्षिकमारणम्॥ माक्षिकस्य त्रयो भागा भागैकः सैंधवस्य च। मातुलुङ्गद्रवैर्वाथ
जंबीरस्य द्रवैः पचेत्। चालयेल्लोहजे पात्रे यावत्पात्रं सुलोहितं। भवेत्ततस्तु संशुद्धिमृच्छति स्वर्णमाक्षिकं। कुलत्थस्य कषायेन घृष्ट्वा
तैलेन वा पुटेत्। तक्रेण वाजमूत्रेण म्रियते स्वर्णमाक्षिकम्॥ अथ तारमाक्षिकशोधनम्॥ कर्कोटी मेषशृंगी उस्थैर्द्रवैर्जंबीरजै
र्दिनम्। भावयेदातपे तीव्रे विमला शुध्यति ध्रुवं॥ अथ तुत्थशोधनम्॥ विष्ठया मर्दयेत्तुत्थं मार्जारकपोतयोः। दशांशं टंकणं द
त्वा पचेल्लघुपुटे ततः। पुटं दध्ना पुटं क्षौद्रैर्देयं तुत्थविशुद्धये॥ ॥अथाभ्रकशोधनमारणम्॥ कृष्णाभ्रकं धमेद्वह्नौ ततः क्षीरे विनिक्षिपेत्। भि
न्नपत्रं तु तत्कृत्वा तंडुलीयाम्लयोर्द्रवैः॥ भावयेदष्टयामं तदेवं शुध्यति चाभ्रकम्। कृत्वा धान्याभ्रकं तत्तु शोषयित्वा च मर्दयेत्। अर्कक्षीरै
र्दिनं खल्वे चक्राकारं च कारयेत्। वेष्टयेदर्कपत्रैश्च सम्यग्गजपुटे पचेत्। पुनर्मर्द्य पुनः पाच्यं सप्तवारान्पुनः पुनः। ततो वटजटाक्का
थैस्तद्वद्देयं पुटत्रयं। म्रियते नात्र संदेहः सर्वयोगेषु योजयेत्। तुल्यं घृतं मृताभ्रेण लोहपात्रे विपाचयेत्॥ घृते जीर्णे तदभ्रं तु सर्वयोगे
षु योजयेत्। मृतं त्वभ्रं हरेन्मृत्युं जरापलितनाशनं। अनुपानैश्च संयुक्तं तत्तद्रोगहरं परम्॥ अथान्यः प्रकारः॥ शुद्धं धान्याभ्रकं मु
स्ताशुंठीवड्डगयोजितं। मर्दयेत्काञ्जिकेनैव दिने चित्रकजैरसैः। ततो गजपुटं दद्यान्नष्काडुद्धत्य मर्दयेत्। त्रिफलावारिणा
तद्वत्पुटेद्देयं पुटे त्रिभिः। बलागोमूत्रमुशलीतुलसीसूरणद्रवैः। मर्दितं पुटितं वह्नौ म्रियते लं वजेन्मृतिं॥ ॥अथ नीलांजन

शार्ङ्ग० शोधनम्॥ नीलांजनं चूर्णयित्वा जंवीरद्रवभावितं। दिनैकमातपे शुद्धं भवेत्कार्येषु योजयेत्। एवं गैरिककासीसटंकणानि व
३५ राटिका। शंखतेरी च कंकुष्ठं शुद्धिमायाति निश्चितम्॥ अथ मनःशिलाशोधनम्॥ पचेत्त्र्यहमजामूत्रे दोलायंत्रे मनःशिलां। भा
वयेत्सप्तधा पित्तैरजायाः शुद्धिमृच्छति॥ अथ तालकशुद्धिः॥ तालकं कणशः कृत्वा संचूर्णि काञ्जिके क्षिपेत्। दोलायंत्रेण या -र्णं३
मैकं ततः कूष्माण्डजैर्द्रवैः। तिलतैले पचेद्यामं यामं च त्रिफलाजलैः। एवं यंत्रे चतुर्यामं पक्वं शुद्ध्यति तालकम्॥ अथ रसकशुद्धिः॥ न
रमूत्रे च गोमूत्रे सप्ताहं रसकं पचेत्। दोलायंत्रेण शुद्धः स्यात्ततः कार्येषु योजयेत्॥ ॥ अथ सत्त्वनिर्गमः॥ लाक्षामीनाः पयस्यंगं टंकणं स
मम्द्रुकं। पिण्याकं सर्षपाः शिग्रुगुञ्जाः गुडसैंधवैः। यवतिक्तान्वितं द्रौ दुग्धयालाभं विचूर्णयेत्। एभिर्विमिश्रिताः सर्वे धातवो
गाढवन्हिना। मूषाध्माताः प्रजायन्ते मुक्तसत्त्वा न संशयः॥ अथ रत्नानां शोधनमारणं॥ कुलत्थकोद्रवक्वाथे दोलायंत्रे विपाचयेत्।
व्याघ्रीकन्दगतं वज्रं त्रिदिनं शुद्धिमृच्छति। तप्तं तप्तं तु तद्वज्रं खरमूत्रे निषेचयेत्। पुनस्ताप्यं पुनः सेच्यमेवं कुर्यात्त्रिसप्तधा। मत्कु
णैस्तालकं पिष्ट्वा यावद्द्रवति गोलकं। तद्गोले निहितं वज्रं तद्गोलं चाधितं ध्मेत्। सेचयेदश्वमूत्रेण तद्गोले च क्षिपेत्पुनः। रुद्ध्वा ध्मातं
पुनः सेच्यमेवं कुर्यात्त्रिसप्तधा। एवं च म्रियते वज्रं चूर्णं सर्वत्र योजयेत्॥ ॥ अन्यदपि॥ हिंगुसैन्धवसंयुक्ते क्वाथे कौलत्थजे क्षि
पेत्। तप्तं तप्तं पुनर्वज्रं भस्म याति त्रिसप्तधा॥ ॥ अन्यच्च॥ मत्कुणं कांस्यजे पात्रे निगृह्य स्थापयेत्सुधीः। सभीतो मूत्रयेत्तत्र शा०सं०
मूत्रे वज्रं समावपेत्। तप्तं तप्तं च बहुधा वज्रस्यैवं मृतिर्भवेत्॥ ॥ अथ वैक्रान्तमारणम्॥ ॥ वैक्रान्तं वज्रवच्छोध्यं नीलं वाले ३५

हितन्तया। हयमूत्रेण संक्षिप्य तप्तं तप्तं द्विसप्तधा। ततस्तु मेषदुग्धेन तु पंचांगे गोलके क्षिपेत्। पुटे सुखपुटे रुद्ध्वा कुर्यादेवं च सप्तधा।
वैक्रान्तं भस्मतां याति वज्रस्थाने नियोजयेत्॥ ॥अथ पद्मरागशोधनमारणम्॥ खरस्ये दोलिकायंत्रे जयंत्याः स्वरसेन वा। मणि
मुक्ताप्रवालानि यामैकं शोधनं भवेत्। कुमार्या तन्दुलीयेन स्तन्येन च निषेचनात्। प्रत्येकं सप्तधा लंचतस्त तथा क्लि कृत्स्नशः। मौ
क्तिकानि प्रवालानि तथा रत्नान्यशेषतः॥ कृष्णाद्विविधवर्णानि म्रियन्ते नात्र संशयः। उक्तमाक्षिकवन्मुक्ताः प्रवालानि च मारयेत्।
वज्रवत्सर्वरत्नानि शोधयेन्मारयेत्तथा॥ ॥अथ शिलाजतुशोधनम्॥ शिलाजतु समानीय ग्रीष्मतप्तशिलास्रुतं। गोदुग्धे
त्रिफलाक्वाथैर्भृंगद्रावैश्च मर्दयेत्। आतपे दिनमेकैकं तत्तच्छुष्कं सुद्धतां व्रजेत्॥ ॥अथान्यः शिलाजतुकरणप्रकारः॥ मु
खंडं शिलाजतु शिलां सूक्ष्मखंडं प्रकल्पितां॥ निक्षिप्यानुष्णपानीये यामैकं स्थापयेत्सुधीः। मर्दयित्वा ततो नीरं गृह्णीयाद्वस्त्र
गालितं। स्थापयित्वा घर्मतो त्रे धारयेदातपे बुधः। उपरिस्थं घनं यत्स्यात्तत्क्षिपेदन्यपात्रके। धारयेदातपे तस्मादुपरिस्थं घनं नयेत्। ए
वं पुनः पुनर्नीत्वा द्विमासाभ्यां शिलाजतु। भवेत्कार्यक्षमं वह्नौ क्षिप्तं लिङ्गोपमं भवेत्। निर्धूमं च ततः शुद्धं सर्वकर्मसु योजयेत्॥
अधः स्थितं च यत्तोयं तस्मिन्नीरं विनिक्षिपेत्। विमर्द्य धारयेद्घर्मे पूर्ववच्चैव तन्नयेत्॥ ॥अथ मण्डूरकरणम्॥ अक्षाङ्गा
रैर्धमेत्किट्टं लोहजं तत्तु गोजलैः। सेचयेत्तप्ततप्तं च सप्तवारं पुनः पुनः। चूर्णयित्वा ततः क्वाथे द्विगुणे त्रिफलाभवे। आलोड्य भर्ज
येद्व्योम मण्डूरं जायते वरं॥ ॥अथ क्षारकल्पना॥ क्षारवृक्षस्य काष्ठानि शुष्काण्यग्नौ प्रदीपयेत्। नीत्वा तद्भस्म संपात्रे क्षिप्त्वा नी

शार्ङ्ग॰ रेचनं गुणी। विमर्द्य धारयेद्रात्रौ प्रातस्तस्य जलं नयेत्। तन्नीरं क्वाथयेद्वह्नौ यावत्सर्वं विशुष्यति। ततः पात्रात्समुल्लिख्य ग्राह्या रोग्या
३६ घः सितप्रभः। वर्णाभः प्रतिसार्यः स्यात्सेयः सात्वा यवक्षितः। इति क्षारषट्कं धीमान्प्रयुक्तं कार्ये बुधो ऽनयेत्॥ ॥इति श्रीदामोदरसू
नुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने धातुशोधनमारणकल्पनाध्यायः ११ ॥ पारदः सर्वरोगाणां जेता पुष्टिक
रः स्मृतः। सुज्ञेन साधितः कुर्यात्संशुद्धिं देहलोहयोः। रसेन्द्रः पारदः सूतो हरजः सूतको रसः। मुकुन्दश्चेति नामानि ज्ञेयानि रसकर्म
सु। ताम्रताररनागाश्च हेमवङ्गौ च तीक्ष्णकं। कांस्यकं कृत्तलोहं च धातवो नव ये स्मृताः। स्पर्धोऽग्निनाग्रहणानेकथितानामसिः क्रमा
त्॥ ॥अथ रसशोधनम्॥ राजीरसोनमरवो यां रसं क्षिप्त्वा विवर्धयेत्। वस्त्रे त्रिहालिकायन्त्रे स्वेदयेत्काञ्जिकेऽत्र हमा। दिनैकं मर्दयेत्तत्तं
कुमारीसंभवैर्द्रवैः। तथा चित्रकजैः क्वाथैर्मर्दयेदेकवासरं। काकमाचीरसैस्तद्वद्दिनमेकं च मर्दयेत्। त्रिफलायास्ततः क्वाथै रसो मर्द्यः
प्रयत्नतः। ततस्तेभ्यः पृथक्कुर्यात्सूतं प्रक्षाल्य काञ्जिकैः। ततः क्षिप्त्वा रसं खल्वे रसार्द्धं च सैन्धवं। मर्दयेन्निंबुकरसैर्दिनमेकम
नारतं। ततो राजीरसोनाभ्यां मुख्यैस्थानवसादरः। ऐतैरसमैस्तद्वत्ततो मर्द्यः सुखोष्णुना। ततः संशोष्य चक्राभं कृत्वा लिप्त्वा च हिङ्गुना
। क्षिप्त्वा स्थालीसंपुटे कृत्वा परस्परे लवणेन च। अधःस्थालीतनो मुद्रां दद्याद्दृढतरां बुधः। विशोष्य मुद्रिकां विधायाधो निषिंचेदंबुनो
परि। ततस्तीव्राग्निनलं दद्यात्प्रहरत्रयं। एवं क्षिपस्यपातस्रधूर्धरसो दोषविवर्जितः। अथ चोर्द्धपिठरीमध्ये लग्नो ग्राह्यो रसोत्तमः। अ शा॰ म॰
थ गंधकशोधनम्॥ लोहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत्॥ तप्ते घृते तत्समानं क्षिपेद्गंधकजं रजः। विद्रुतं गंधकं ज्ञात्वा दु ३६

ग्धमध्ये विनिक्षिपेत्॥ एवं गन्धकशुद्धिः स्यात्तत्तत्कार्येषु योजयेत्॥ ॥अथ दरदशोधनं॥ मेषीक्षीरेण दरदमम्लवर्गैश्च भावितं॥ सप्तवारं प्रयत्ने
न शुद्धिमायाति निश्चितं॥ ॥अथ दरदात्सूताकृष्टिः॥ निम्बूरसैर्निम्बपत्ररसैर्वा याममात्रकं। घृष्ट्वा दरदमूर्ध्वं च पातयेत्सूतयुक्तिवत्। ततः
शुद्धं रसं तस्मान्नीत्वा कार्येषु योजयेत्॥ अथ शुद्धरसस्य मुखकरणम्॥ ॥कालकूटो वत्सनाभः शृङ्गकश्च प्रदीपनः। हालाहलो ब्रह्मपुत्रो हा
रिद्रः सक्तुकस्तथा। सौराष्ट्रिक इति प्रोक्ता विषभेदा अमी नव॥ अर्कसेहुण्डधत्तूरलाङ्गलीकरवीरकाः। गुञ्जाहिफेनावित्येताः सप्तोपविषजा
तयः॥ एतैर्विमर्दितः सूतः छिन्नपक्षः प्रजायते। मुखं च जायते तस्य धातूंश्च ग्रसते त्वरा॥ ॥अन्यच्च॥ अथवा त्रिकटुक्षारौ राजी लवण
पंचकं। रसोनो नवसारश्च शिग्रुश्चैकत्र चूर्णितैः। समांशैः पारदादेतैर्जम्बीरोत्थद्रवेण वा। निम्बूतोयैः काञ्जिके वा सोष्णखल्वे विमर्दयेत्।
अजाशकृत्तुषाग्नीनां गर्त्ते तत्त्रितयं क्षिपेत्॥ तस्योपरि स्थितं खल्वं तप्तखल्वमिदं भवेत्॥ अहोरात्रत्रयेणास्याद्रसे धातुचरं मुखम्॥ अ
न्यच्च। अथवा बिंदुरीकीटैरसो मर्दितो वासरं। लवणाम्ले मुखं तस्य जायते धातुघस्मरम्॥ ॥अथ गन्धकजारणम्॥ अथ कच्छपयं
त्रेण गन्धजारणमुच्यते। मल्लकुण्डे निक्षिपेन्नीरं तन्मध्ये च शरावकम्। महत्कुण्डपिधानाभं मध्ये मेखलया युतं। सिक्त्वा च मेखलामध्यं चूर्णेना
त्र रसं क्षिपेत्। रसस्योपरि गन्धस्य रजो दद्यात्समांशकम्। दत्त्वोपरि शरावं च भस्ममुद्रां प्रदापयेत्॥ तस्योपरि पुटं दद्याच्चतुर्भिर्गोमयोप
लैः। एवं पुनः पुनर्गन्धं षड्गुणं जारयेद्बुधः॥ गन्धे जीर्णे भवेत्सूतस्तीक्ष्णाग्निः सर्वकर्मकृत्॥ ॥अथ रसमारणम्॥ धूमसारं रसं तोरी गन्ध
कं नवसादरं। यामैकं मर्दयेदम्लैर्भागं कृत्वा समं समम्। काचकूप्यां विनिक्षिप्य तां च सम्यग्दृढमुद्रया। विलिप्य परितो वक्त्रे मुद्रां दत्त्वा च शोषयेत्॥ अधः

मिलामामस्य

शा॰र्ङ्ग॰ सच्छिद्रपिठरीमध्ये कूपीं निवेशयेत्। पिठरीं वालुकापूरैर्भृत्वा चाकूपिकागलं। निवेश्य चुल्ल्यां तदधः कुर्याद्वह्निं शनैः शनैः। तस्मादप्यधिकं किं
३७ चित्तावकं ज्वालयेत्क्रमात्। एवं द्वादशभिर्यामैर्म्रियते सूतकोत्तमः। स्फोटयेत्स्वांगशीतं तमूर्ध्वगं गंधकं त्यजेत्। अधस्थं मृतसूतं च सर्वक
र्मसु योजयेत्॥ ॥तथा चापामार्गस्य बीजानां मूषायुग्मं प्रकल्पयेत्। तत्संपुटे न्यसेत्सूतं मलयूरजसा मिश्रितं। द्रोणपुष्पीप्रसूनानि
विडङ्गं मिरिमेदकः। एतच्चूर्णमधोर्ध्वं च दत्वा मुद्रां प्रदापयेत्। तं गोलं मुद्रयेत्सम्यक् सम्यक् शरावसंपुटे सुधीः। मुद्रां दत्वा शोषयित्वा ततो गज
पुटे पचेत्॥ एवमेकपुटेनैव जायते भस्मसूतकम्॥ ॥अन्यदपि॥ काकोडुंबरिकादुग्धैरसं किंचिद्विमर्दयेत्। तद्दुग्धघृष्टहिंगोश्च
मूषायुग्मं प्रकल्पयेत्। क्षिप्त्वा तत्संपुटे सूतं तत्र मुद्रां प्रदापयेत्। धृत्वा तत्तालकं प्राज्ञो मृच्छरावसंपुटे दृढे। पचेन्मृदुपुटेनैव
सूतको याति भस्मताम्॥ ॥अन्यच्च॥ नागवल्लीरसैर्घृष्टः कर्कोटीकन्दगर्भितः। मृच्छरावसंपुटे पक्वः सूतो यात्येव भस्मताम्॥ ॥अथ ज्व
रांकुशः॥ खल्वितं हारितं शुद्धं ज्वालामुख्या रसेक्षमं। रुध्वा भाण्डे पचेच्चुल्ल्यां यामयुग्मं ततो नयेत्। अष्टांशं त्रिकटुं दद्यात् त्रिकमा
त्रं च मर्दयेत्। नागवल्ल्या रसैस्तावद्वातपित्तज्वरापहम्। अयं ज्वराङ्कुशो नाम रसः सर्वज्वरापहः॥ ॥अथ ज्वरारिरसः॥ पारदं रसकं तालं तु
त्थं टंकणगन्धकम्। सर्वमेतत्समं शुद्धं कारवेल्ल्या रसैर्दिनं। मर्दयेल्लेपयेत्तेन ताम्रपात्रोदरं भिषक्। अङ्गुलार्द्धप्रमाणेन ततो रुध्वा
च तन्मुखम्। पचेत्तं वालुकायन्त्रे क्षिप्त्वा धान्यानि तन्मुखे। यदा स्फुटन्ति धान्यानि तदा सिद्धं विनिर्दिशेत्। ततो नयेत्स्वांगशीतं तत्ता रा॰म॰
म्रपात्रोदराद्भिषक्। रसं ज्वरारिनामानं विचूर्ण्य मरिचैः समं। माषैकं पर्णखण्डेन भक्षयेन्नाशयेद्ध्रुवम्। त्रिदिनं विषमं तीव्र ३७

दसमं

मेकद्वित्रिचतुर्थकम्॥ ॥अथ शीतज्वरारिरसः॥ तालकं तुल्यकं ताम्रं रसं गन्धं मनःशिला। माक्षिकं कर्षकर्षं प्रयोक्तव्यं मर्द्दयेत्त्रि
फलाम्बुभिः। गोलं न्यसेत्संपुटके पुटं दद्यात्प्रयत्नतः॥ ततो नीत्वार्कदुग्धेन वज्रीदुग्धेन तत्सधा। क्वाथेन दन्त्याः शणमाषाम्ल
वेतसमथापुनः॥ माषमात्रं रसं दद्यात्पञ्चाशन्मरिचैर्युतं। गुडं गाङ्गेयकं चैव तुलसीदलयुग्मकं। भक्षयेत्त्रिदिनं भक्ष्या
शीतारिं दुर्लभं परम्। पथ्यं दुग्धौदनं देयं विषमं शीतपूर्वकम्। दाहपूर्वं हरत्याशु तृतीयकचतुर्थकौ। ह्याहिकं सत
तं चैव वैवर्ण्यं च नियच्छति॥ ॥अथ ज्वरघ्नी गुटिका॥ भागैकः स्याद्रसाद्द्वौ च पिप्पलिकात्रयः। आकारकरभात्तथा
न्धं कटुतैलेन शोधितं। फलानि चेन्द्रवारुण्याश्च तुभौ गोन्मिता अमी। एकत्र मर्द्दयेच्चूर्णमिन्द्रवारुणिकारसैः। माषा
न्मितां गुटीं कृत्वा दद्यात्सर्वज्वरे बुधः। छिन्नारसानुपानेन ज्वरघ्नी गुटिका मता॥ ॥अथ लोकनाथरसः॥ शुद्धो बुभुक्षि
तः सूतो भागद्वयमितो भवेत्। तथा गन्धस्य भागो द्वौ कुर्यात्कज्जलिकां तयोः। सूताच्चतुर्गुणाश्चैव कपर्द्देषु विनिक्षिपे
त। भागैकं टङ्कणं दत्वा गोक्षीरेण विमर्द्दयेत्। तथा शंखस्य खण्डानां भागानष्टौ प्रकल्पयेत्॥ क्षिपेत्सर्वं पुटस्यांत
ष्कर्णे लिप्तशरावयोः। गर्ते हस्तोन्मिते धृत्वा पुटेद्गजपुटेन च। स्वाङ्गशीतं समुद्धृत्य पिष्ट्वा तत्सर्वमेकतः। षड्गुञ्जासं
मितं चूर्णमेकोनत्रिंशदूषणैः। धृतेन वातजे दद्यान्नवनीतेन पित्तजे। क्षौद्रेण श्लेष्मजे दद्यादतीसारे जयेत्तथा॥ अग्रह
चौ ग्रहणीरोगे कार्श्ये मन्दानले तथा। काशश्वासेषु गुल्मेषु लोकनाथरसं भिषक्। तस्योपरिष्टात्तं च भुञ्जीत कव

शार्ङ्ग लत्रयं। मंचेत्तनौकमुत्तानः शयीतानुपधानकः। अन्नमल्पमनुष्णं सघृतं भुञ्जीत मधुरं दधि। प्रायेणोष्णाद्दुःखं मांसं प्रदेयं घृतया
३८ न्वितं। सदुग्धमन्नं दद्याद्वा जाते ऽग्नौ सान्ध्यभोजनो। सहतान्मुकुन्दवटकान्यङ्गुलेष्वचारयेत्। तिलामलककल्केन नस्य
पयेत्त सर्पिषा यथा। अभ्यङ्गयेत्त सर्पिषा च स्नानं कोष्णोदकेन च। छिन्ने लिङ्गे न गन्धीयात्र बिल्वं कारवेल्लकं। वृन्ता
कं शफरी चिंचां त्यजेच्छ्यामायामसेयुतो। मध्यांस धानकं हिंगुशुंठी माषान्मसूरकान। कूष्मांडं राजिकां कोपं काञ्जि
कं चैव वर्जयेत्। त्यजेद्युक्तं निद्रां च कांस्यपात्रे च भोजनं। ककारादियुतं सर्वं त्यजेच्छाकादिकं तथा। आहार्यं लो
कलाय स्तनुगुप्रमनत्त्रवासरोगपूर्णोति थो गुल्म पद्वे जाते चेद् बलेत था। पूजयित्वा लोकनाथं कुमारी भोजये
त्ततः। दानं दत्वाद्विजातिकाम धेन्या होरसोत्तमः। तस्मान्मुक्तापतेतापस्तदाश्मक्षीरयायुतं। खल्वे गुडूच्या गन्धीया दं
शारेचनयायुतं। खर्जूरं दाडिमं द्राक्षा मिक्षुखण्डं निदापयेत्। अरुणचैनिस्लु पंधान्यंछत मेहेसशर्करां दद्या
त्तथा ह्वरेधान्यगुडूची क्वाथमाहरेत्। ताउशीरवासक क्वाथं दद्यात्समधुशर्करां। रक्तपित्ते कफे वाते श्वासे च स्वरसं
हृये। अग्निमन्थं जपाचूर्णं मधुना निशि दापयेत्। निद्रानाशे ऽतिसारे च ग्रहण्यां मन्दपावके। सौवर्चलाम्लपाक
ल्मा चूर्णमुष्णजलैः पिबेत्। मूले ऽजीर्णे तथा कृष्णा मधुयुक्ता हरेहिता। हलीहादरे वातरक्ते कुष्ठे चैव गुडूच्यारे। राम०
नासिकास्रुतरक्ते च रसं दाडिमपुष्पजं। दूर्वायाः स्वरसं नस्ये दद्यात्सुशर्करायुतं। कोलमज्जा कणा वर्हिपक्ष्म ३८

मौक्तिमशर्क्करं। मधुना लेहयेत्कुर्द्दिहिक्काकोपमशान्तये। विधिरेष प्रयोक्तव्यः सर्व्वस्मिन्पोटलीरसे। मृगांके हेमगर्भे च मौक्तिके
षपरेषु च। इत्ययं लोकनाथो ... क्षयरुजो जयेत्॥ ॥अथ पूर्णमृगांकपोटलीरसः॥ भूर्जेवत्तनुपत्राणि हेम्नः सूतस्य माणिका
रयेत्। तुल्यानि तानि सूतेन खल्वे क्षिप्त्वा विमर्द्दयेत्। काञ्चनारिरसेनैव ब्रह्मलामुख्या रसेन बालाङ्कुल्या वारसेस्तावद्यावद्भव
तिपिष्टिका। ततो हेमस्य तूर्य्यंशं टंकणं तत्र निक्षिपेत्। विषमौक्तिकचूर्णं च हेमद्विगुणमावपेत्। तेषु सर्व्वसमं गन्धं क्षिप्त्वा चैकत्र मर्द्द
येत्। तेषां कृत्वा ततो गोलं वासोभिः परिवेष्टयेत्। पश्चात्सूत्रेण वेष्टयित्वा बहुभिर्गोमयैः पुटेत्। ततः शीते समाकृष्टे गन्धं सूतसमं क्षिपे
त्। श्लक्ष्णां च पूर्व्ववत्खल्वे पुटेद्रुजपुटेन च। स्वाङ्गशीते ततो नीत्वा गुञ्जायुग्मं प्रयोजयेत्। त्र्यूषणसिन्धुरिचैर्युक्तः कृष्णात्रययुतोऽथवा। वि
लोकस्येयाहिपादीने केकारसरक्तिका। सपिप्पा मधुना वापि दद्याद्दोषाघयेत्तया। लोकनाथसमं पथ्यं कुर्यात्तत्स्वस्थमनाः शुचिः। श्ले
ष्माणं ग्रहणीं कासं श्वासं क्षयमरोचकं। मृगांकोऽपरसो हन्यात्कं प्रालं बलहानिताम्॥ ॥अथ हेमगर्भपोटलीरसः॥ सूतात्पाद
प्रमाणेन हेम्नः पिष्टीं प्रकल्पयेत्। तयोः स्याद्द्विगुणो गन्धो मर्द्दयेत्कांचनारिणा। कृत्वा गोलं क्षिपेन्मूषासंपुटे मुद्रयेत्ततः। पचे
द्भूधरयंत्रेण वासरत्रितयं बुधः। ततस्तं उद्धृत्य तत्समं वै दद्याद्गन्धं च तत्सममा। मर्द्दयेदार्द्रकरसैश्चित्रकस्य रसेन वा। स्थूलपीतव
राटांश्च पूरयेत्तेन युक्तितः। एतस्मादौषधात्कुर्याद्दशमांसेन टंकणं। टंकणार्द्धं विषं दद्यात्पिप्पल्या मेहं उ उ गुधकैः। मुद्रयेत्तेन कल्के
न वराटानां मुखं निचाः मा ऐचूर्णेन प्रलिप्तेऽथ धृत्वा मुद्रां प्रदापयेत्। गर्त्ते हस्तोन्मिते धृत्वा पुटेद्रजपुटेन च। स्वाङ्गशीतं रसं नी

शा॰दू॰ लामदद्यात्॥ कनाथवतायर्थ्यंमर्गो कवदेयंक्षि दिनं लवणंत्र्यडेतत्। यदाम्लं दर्शिवेन्नस्य दद्यात् क्षिज्वाशतं तनः। मधुयुक्तं तथा श्लेष्म
३९ कोपे दद्यात् कुडूचिकां त्रिरिके भर्जितामक्षाप्रदे यादधिसंयुतां। जयेत्काशं स्वयंग्या संग्रहणी मरुचिं तथा। अग्निं च कुरुते दीप्तं कफवातं नि
यच्छति हेमगर्भः परो ज्ञेयः श्लेष्मपोटलिकाभिधः॥ ॥अथ द्वितीयहेमगर्भपोटली रसः॥ रसस्य भागाश्चत्वारः तत्पादांशं कनकस्य चान्यो
ऽपि क्षिप्त्वा कृत्वा गन्धोद्वादशभागिकः। कुर्यात्कज्जलिकां तेषां मुक्ताः भागाश्च षोडश। चतुर्विंशाश्च शंखस्य भागो कं टंकणस्य चाप एकश्च
दद्येत्सर्वं यक्षनिंबूकजैरसैः॥ कृत्वा तेषां ततो गोलं मूषायां पुटके न्यसेत्। मुद्रां दत्वा ततो हस्तमात्रे गर्त्ते च गोमयैः। पुटेद्गजपुटेनैव स्वांग
शीतं समुद्धरेत्॥ पिष्ट्वा गुञ्जा चतुष्कं त्वं दद्यात्र्यूषणसंयुतं। एकोनत्रिंशद्गुञ्जानं मरिचैः सहदीयते॥ राजते मण्मये पात्रे काचजे वा
लेहयेत्। लोकनाथसमं पथ्यं कुर्यात्स्वपतमानसः। कासे श्वासे क्षये वाते कफे ग्रहणिकागदे। ख्यातो सारप्रयोक्तव्यो पोटली हेमगर्भिका
॥ ॥अथ हुताशनो रसः॥ शुद्धसूतं विषं गन्धं प्रत्येकं शाणसम्मितं। क्षन्नबीजं त्रिशाणं स्यात् सर्वेभ्यो द्विगुणं भवेत्। हेमाह्वा कारयेद्
भावनां सप्तधा ततः। देयं जंबीरमज्जाभिः स्तुंगी गुञ्जाष्टयोन्मितम्। आर्द्रक स्वरसेर्वा पिवेद्रहन्ति त्रिदोषजं। एकाहिकं द्याहिकं च त्र्या
हिकं च चतुर्थकं। विषमं च ज्वरं हन्ति भावतो यद्वराकुशः॥ ॥अथ्यातिसारे आनंदभैरवो रसः॥ दरदं वत्सनाभं च मरिचं टंकणं कण
॥ चूर्णयेत्समभागेन रसो ह्यानन्दभैरवः। गुञ्जैकं वा द्विगुञ्जं वा बलं ज्ञात्वा प्रयोजयेत्। मधुना लेहयेच्चानु कुटजस्य फलत्वचौ। चूर्णितं रा॰प्र॰
कर्षमात्रं तु हिन्दोषोत्याति सारजितं। अन्नं दापयेत्पथ्यं गवाजं तक्रमेव वा। पिपासायां जलं शीतं विजया विहितानिशि। अथ यल्वुग्र विव ३९

८

मरगोरसः॥ विषं पलमितं सूतः शाणिकश्चूर्णयेद्द्वयं तच्चूर्णं संपुटे क्षिप्त्वा काचलिप्तशरावयोः। मुद्रां दत्वा च संशोष्य ततश्चुल्ल्यां निवेशये
त्। वह्निं शनैः शनैः कुर्यात्प्रहरद्वयसंख्यया। ततउद्घाट्य तन्मुद्रामुपरिस्थशरावके। संलग्नो यो भवेद्धूमस्तं गृह्णीयाच्छनैः शनैः। वायुस्पर्शो
यथा न स्यात्तथा कूप्यां निवेशयेत्। यावन्मात्रा मुखे लग्नं कूप्यां तिष्ठति भेषजम्। तावन्मात्रो रसो देयो मूर्छिते सन्निपातिनि। क्षुरेणापहिते
मूर्ध्नि तत्राङ्गुल्या वघर्षयेत्। रक्तभेषजसंपर्कान्मूर्छितोऽपि हि जीवति। तथैव सर्पदष्टस्तु मृतावस्थोऽपि जीवति। पश्चात्तोयो भवेत्तत्सम
धुरं तत्र दीयते॥ अथ जलचडारसः॥ सूतभस्मसमं गंधं गंधात्पादं मनःशिला। माक्षिकं पिप्पली व्योषं प्रत्येकं शिलया समं चूर्णि
येद्भावयेत्पित्तैर्मत्स्यमायूरसंभवैः। सप्तधा भावयेत्सुषं देयं गुञ्जाद्वयं हितं। तालपर्णीरसश्चानु पञ्चकोलशृतं यवा॥ जल
योगश्च कर्तव्यस्तेन वीर्यं भवेद्रसो जलचडारसो नाम सन्निपातं नियच्छति॥ ॥अथ पञ्चवक्त्रोरसः॥ शुद्धं सूतं विषं गन्धं म
रिचं टंकणं कणां। मर्दयेद्धूर्तजैर्द्रावैर्दिनमेकं च शोषयेत्। पञ्चवक्त्रो रसो नाम द्विगुञ्जः सन्निपातजित्। अर्कमूलकषायं तु सके
पमनुपाययेत्। शुक्तं दध्योदनं पथ्यं जलयोगं च कारयेत्। रसेनानेन नश्यन्ति सन्निपातोद्भवाः कफादयः। मधार्द्रकरसं चानुपिबेद्वह्निविवृ
द्धये। पथ्ये दृष्टे न मांसाशी शक्रो भवति पावकः॥ ॥अथ उन्मत्तोरसः॥ रसगंधकतुल्यांशं धत्तूरफलजैर्द्रवैः। मर्दयेद्दिनमेकं तु तत्तुल्यं त्रि
कटुं क्षिपेत्॥ उन्मत्ताख्योरसो नाम्ना नस्यात्सन्निपातजित्॥ ॥अथ पञ्चामृतोरसः॥ निस्त्वक् जेपालबीजं च दशनिष्कं प्रचूर्णयेत्। ता
मरिचं पिप्पली सूतं प्रतिनिष्कं विमिश्रयेत्। मायाजंबीरजैर्द्रावैः सप्ताहं संप्रपल्लतः। रसोयमञ्जने दत्तः सन्निपातं विनाशयेत्॥ अथ

शार्ङ्ग नाराचरसः॥ सूतं टंकणकं तुल्यं मरिचं सूततुल्यकम्। गन्धकं पिप्पली शुंठी द्वौ द्वौ भागौ विचूर्णयेत्॥ सर्वैस्तुल्यं क्षिपेद्दन्तीबीजं निस्तुषितं भिष
५० क्। द्विगुञ्जं रेचनं सिद्धं नाराचोयं महारसः॥ आध्मानमलविष्टम्भमुदावर्तं च नाशयेत्॥ ॥अथ इच्छाभेदीरसः॥ दरदं टंकणं शुंठी पिप्पली
चैककार्षिकी। हेमाह्वा पलमात्रा स्याद्दन्तीबीजं च तत्समं। विचूर्ण्यैकत्र सर्वाणि जंबीरद्रवेण भावयेत्। त्रिगुञ्जं रेचनं दद्यात् द्विगुञ्जं वाध्मा
नरोगिषु॥ ॥अथ राजमृगाङ्को रसः॥ सूतभस्म त्रयो भागा भागैकं हेमभस्मकं। सूततामस्य भागैकं शिलागन्धकतालकं। भागप्रति
भागद्वयं शुद्धमेकीकृत्य विचूर्णयेत्॥ वराटीः पूरयेत्तेन छागक्षीरेण टंकणं॥ पिष्ट्वा तेन मुखं रुध्वा मृद्भाण्डे संनिरोधयेत्। शुष्कं गज
पुटे पक्त्वा चूर्णयेत्स्वाङ्गशीतलम्। रसो राजमृगाङ्कोयं चतुर्गुञ्जः क्षयापहः। दश पिप्पलिकाक्षौद्रैरेकोनत्रिंशदूषणैः॥ ॥अथ श्वासकुठार रसः॥
रसो गंधो विषं चैव टंकणं च मनःशिला। एतानि सममागानि मरिचं चाष्टटंककं। एकैकं मर्दयित्वा खल्वे सूक्ष्मं विधाय च। त्रिकटुं टंकषट्कं च दलाय
ख्याद्विकणीयेत्। सर्वमेकत्र संयोज्य काचकूप्यां विनिःक्षिपेत्। श्वासे कासे च मंदेऽग्नौ तथा श्लेष्मामयेषु च। गुञ्जामात्रं प्रदातव्यं पर्णखण्डे
न बुद्धिमान्। सन्निपाते तु मूर्छायां मदमस्मारे तथा पुनः। मतिमोहत्वमापन्ने द्यं दद्याद्विचक्षणः। रसः श्वासकुठारोयं सर्वश्वासविका
रनुत्। ॥अथ अग्निरसः॥ शुद्धं सूतं द्विधा गन्धं कुर्यात्खल्वेन कज्जलीं। तयोः समं तीक्ष्णचूर्णं मर्द्दयेत्कन्यकाद्रवैः। द्वियामान्ते कृतं गो
लं ताम्रपात्रे विनिक्षिपेत्। आच्छाद्यैरण्डपत्रेण यामार्द्धेनोष्णता भवेत्। धान्यराशौ न्यसेत्पश्चादहोरात्रात्समुद्धरेत्। संपेष्य गाल रा.म.
येद्वस्त्रे सत्यं वारितरं भवेत्। त्रिकटु त्रिफला लाभिर्जातीफललवङ्गकैः। नवभागो मितैरेतैः समः पूर्वरसो भवेत्। संचूर्ण्य लेहये ५०

म्लैर्दिनैर्मर्द्यं सन्निष्कद्वयं द्वयोः स्वयमग्निरसो नाम्नाह्यकासनिकृन्तनः ॥ अथ सर्पाक्षीवर्त्तीरसः ॥ सूतार्द्धगन्धकौ मर्द्यौ यामैकं कन्यका
द्रवैः । द्वयोस्तुल्यं ताम्रपत्रं पूर्वकल्केन लेपयेत् । दिनैकं स्थालिकायंत्रे पक्वमादाय चूर्णयेत् । सर्पाक्षीवर्त्तिरसो ह्येष पादिगुञ्जः श्वासकृद्भवेत्
॥ अथ स्वच्छन्दभैरवो रसः ॥ शुद्धं सूतं मृतं लोहं ताप्यं गन्धकतालकम् । पथ्याग्निमन्थनिर्गुण्डी ऊषणं टंकणं विषं तुल्यांशं मर्द्द
येत्खल्वे दिनं निर्गुण्डिकाद्रवैः । मुण्डीद्रावैर्दिनैकं तु द्विगुञ्जं वटकीकृतम् । भक्षयेद्वातरोगार्त्तो नाम्ना स्वच्छन्दभैरवम् ॥ रास्नामृता
देवदारु शुण्ठी वातारिजैः शृतम् । समगुग्गुलुं पिवेत्क्वाथमनुपानं सुखावहम् ॥ ॥ अथ हंसपोटली रसः ॥ दग्धाकपर्द्दिका पिप्पल्या
ऊषणं टंकणं विषं । गन्धकं शुद्धसूतं च तुल्यं जंबीरजैर्द्रवैः । मर्द्दयेद्धंसपोटल्याख्यं मरिचाज्यं लिहेदनु । निहन्ति ग्रहणीरोगं पथ्यं तक्रौदनं
हितम् ॥ ॥ अथ त्रिविक्रमो रसः ॥ मृतं ताम्रं जम्बीरैः पाच्यं तुल्यं गते द्रवे । तत्ताम्रं शुद्धसूतं च गन्धकं च समं समम् । निर्गुण्डीस्वरसे मर्द्द्यं घ
म १ दिनैकं गोलं बन्धयेत् यामैकं वालुकायंत्रे पाच्यं भस्म स्याद्द्विगुञ्जकं । बीजपूरकमूलं च सजलं चानुपाययेत् । रसस्त्रिविक्रमो नाम्ना मासै
केनाश्मरीप्रणुत् ॥ अथ महातालेश्वरो रसः ॥ तालं ताप्यं शिलासूतं शुद्धं सैन्धवटंकणं । समांशं चूर्णयेत्खल्वे ह्लेसूत द्विगुणगंधकम् ।
गन्धतुल्यं मृतं ताम्रं जंबीरैर्दिनपञ्चकं । मर्द्द्यं षड्भिः पुटैः पाच्यं भूधरे संपुटोदरे ॥ पुटे पुटे द्रवैर्मर्द्द्यं सर्वमेतत्तुषघलं । क्षिपेल्ले मारितं ता
म्रं लोहभस्म चतुःपलं । जंबीराम्लेन तत्सर्वं दिनं मर्द्द्य पुटेद्दृढम् । त्रिंशदंशं विषं चास्य क्षिप्त्वा सर्वं विचूर्णयेत् । माहिषाज्येन संमिश्रं निष्का
र्द्धं भक्षयेत्सदा । मधुना जैवाकुचीचूर्णं कर्षमात्रं लिहेदनु । सर्वकुष्ठानि हन्त्याशु महातालेश्वरो रसः ॥ ॥ अथ कुष्ठकुठारो रसः ॥ मृतमभ्र

शार्ङ्ग स्मस्मेगन्धोमृतायस्ताम्रगुग्गुलु। त्रिफला च महानिम्बश्चित्रकश्च शिलाजतु। इत्येतच्चूर्णितं कुर्यात्प्रत्येकं शाणषोडश। चतुःषष्टि
४१ कारञ्जस्य बीजचूर्णं प्रकल्पयेत्। चतुःषष्टिमितं चूर्णं बाकुचीफलचूर्णकं। खदिरस्य कषायेन समेन परिभावितं। त्रिशाणं तद्भवांघ्री
रैः क्वाथैर्वा त्रैफलैः पिबेत्॥ त्रिदिनान्तेमे वे स्फोटः सप्ताहाद्वा किलाशके। नीलीगुञ्जाश्चकासीसं धत्तूरं हंसपादिकां सर्षपमञ्च
चाद्रं रीं पिष्ट्वा तुल्यानि लेपयेत्। स्फोटस्थानप्रशान्त्यर्थं समरागं पुनः पुनः। श्वेतकुष्ठं हिनस्त्याशु साध्यासाध्यं न संशयः। ॥अथ श्वि
त्रलेपः॥ गुञ्जाफलाग्निचूर्णं च लेपितं श्वेतकुष्ठनुत्। शिलापामार्गभस्मापि लिप्त्वा श्वित्रं विनाशयेत्। अथ सर्वेश्वरो रसः॥ ॥शुद्धसू \ नि ५
तं चतुर्गन्धं पलेयामं विचूर्णयेत्॥ मृतताम्राभ्रलोहानां दरदं च पलं पलं। सुवर्णं रजतं चैव प्रत्येकं दशनिष्ककं। माषैकं मृतवज्रं
च तालसत्वं पलद्वयं॥ जंबीरोन्मत्तवासाभिः स्नुह्यर्कविषमुष्टिभिः। मर्दयेद्धयारिजैर्द्रवैः प्रत्येकेन दिनं दिनं। एवं सप्तदिनं मर्द्य तद्गोलं व
स्त्रवेष्टितं। वालुकायन्त्रगं स्वेद्यं त्रिदिनेल घुवह्निना। आदाय चूर्णयेत्तत्लं तांप्यलेकं योजयेद्विषं द्विपलं पिप्पलीचूर्णमिश्रं
सर्वेश्वरो रसः। द्विगुञ्जो लिह्यते क्षौद्रैः सुप्तिमण्डलकुष्ठनुत्। वाकुचीदेवकाष्ठं च कर्षमात्रं सुचूर्णयेत्। लिहेदेरण्डतैलाक्तमनुया
ने सुखावहम्॥ ॥ अथ स्वर्णक्षीरीरसः॥ हेमाह्वां पञ्चपलिकां क्षिप्त्वा तक्रघटे पचेत्। तक्रे जीर्णे समुद्धृत्य पुनः क्षीरघटे पचेत्॥
क्षीरे जीर्णे समुद्धृत्य सद्यालपित्वा विशोषयेत्। चूर्णितां पञ्चपलिकां मरिचानां पलद्वयम्॥ पलैकं मूर्च्छितं सूतं तमेकीकृत्वा शुभ राम°
त्पयेत्॥ निष्कैकं सुप्तिकुष्ठार्तः स्वर्णक्षीरीरसोह्वयम्॥ ॥ अथ मेहबद्धको रसः॥ मृतमभ्रमृतं कांतं मुण्डं भस्म शिलाजतु। शुद्धं ता ४१

यं शिलाव्योषं त्रिफलां कोलबीजकं । कपित्थरजनीचूर्णं मधुराजेन भावयेत् ॥ त्रिंशद्वारं विशोष्याथ मधुयुक्तं लिहेत्सदा । निष्कमात्रं हरेन्मे
हान्मेहवह्नीरसो महानाम । हानिम्बस्य बीजानि पिष्ट्वाथ द्रुसन्निता निचापलतंडुलतोयेन घृतनिष्कद्वयेन च । एकीकृत्य पिबेच्चानुहन्ति
मेहं चिरंतनम् ॥ ॥अथ वह्निरसः॥ चतुः सूतस्य गंधोष्टौ रजनी त्रिफला शिवा । प्रत्येकं च द्विभागं स्यात् त्रिकटु पालचित्रकं । प्रत्येकं च
त्रिभागं स्याच्चोषदंती द्विजीरकं । प्रत्येकमष्टभागं स्यादेकीकृत्य विचूर्णयेत् ॥ जयन्ती स्नुकपयो भृङ्ग वह्निवातारितैलकैः । प्रत्येकेन
क्रमाद्भाव्यं सप्तवारं पृथक्पृथक् । महावह्निरसो नाम निष्कमुष्णजलैः पिबेत् । विरेचनं भवेत्तेन तक्रभक्तं ससैन्धवम् ॥ दिनान्ते
दापयेत्पथ्यं वर्जयेच्छीतलं जलं । सर्वोदरहरः प्रोक्तो मण्डवातहरः परः ॥ ॥अथ विद्याधरो रसः॥ गन्धकं तालकं ताप्यं सूतताम्रं मनः
शिलाम् । शुद्धं सूतं च तुल्यांशं मर्दयेद्भावयेद्दिनं ॥ पिप्पल्यास्नुकपयायेण वज्रीक्षीरेण भावयेत् । निष्कार्द्धं भक्षयेत्क्षौद्रैर्गुल्मप्लीहा
दिकं जयेत् । रसो विद्याधरो नाम सूतो मध्वं च पिबेदनु ॥ ॥अथ त्रिनेत्रो रसः॥ टंकणं हरितालं च द्रुं स्वर्णं शुल्वं सूतं रसं ॥ दिनैकं मार्द्द
कद्रावैर्मर्द्य घर्मे रुद्ध्वा पुटे पचेत् । त्रिनेत्राख्यो रसो ह्येष माषमधाज्यकैर्लिहेत् । सैंधवं जीरकं हिंगु समभागाज्यमधुना लिहेदनु । पक्तिशूल
५२ हरः ख्यातो मासमात्रान्न संशयः ॥ ॥अथ शूलगजकेसरी रसः॥ शुद्धं सूतं द्विधा गन्धं यामैकं मर्दयेद्दृढम् । द्वयोस्तुल्यं शुद्धताम्रसं
पुटे तन्निरोधयेत् । ऊर्ध्वाधो लवणं दत्त्वा मृद्भाण्डे धारयेद्भिषक् । ततो गजपुटे पक्त्वा स्वाङ्गशीतं समुद्धरेत् । संपुटं चूर्णयेत्तस्मिं य
र्णा खल्वे द्विगुञ्जकं । भक्षयेत्सर्वशूलानि हिंगुनागरजीरकाः । वचामरिचजं चूर्णं कर्षमुष्णजलैः पिबेत् ॥ अस्याश्नाशयेच्छूलं रसः

शार्ङ्ग॰ स्याच्छूलकेसरी॥ ॥अथाग्नितुंडरसः॥ ॥शुद्धं सूतं विषं गन्धमजमोदा फलत्रयम्। सर्जिक्षारं यवक्षारं वह्निसैन्धवजीरकं। सौवर्च
४१ लं विडङ्गानि सामुद्रं त्र्यूषणं समं। विषमुष्टिः सर्वतुल्यं जंबीराम्लेन मर्द्दयेत्। मरिचाभां वटीं खादेद् वह्निमांद्यप्रशान्तये। ॥अथाजी
र्णकंटको रसः॥ शुद्धं सूतं विषं गन्धं समं सर्वं विचूर्णयेत्॥ मरिचं सर्वतुल्यांशं कंटकार्याः फलद्रवैः। मर्द्दयेद्भावयेत्सर्वमेकविंशतिवा
रकं। वटीं गुञ्जात्रयं खादेत्सर्वाजीर्णप्रशान्तये। अजीर्णकंटकः सोऽयं रसो हंति विसूचिकाम्॥ ॥अथ मन्थानभैरवो रसः॥ मृ
तं सूतं मृतं ताम्रं हिंगु पुष्करमूलकम्। सैंधवं गन्धकं तालं कटुकीं चूर्णयेत्समं। पुनर्नवा देवदाली निर्गुण्डी तण्डुलीयकैः॥
।रि९ तिक्तकोशातकीद्रावैर्दिनैकं मर्द्दयेद्दृढं॥ माषमात्रं लिहेत्क्षौद्रै रसं मन्थानभैरवं। तप्तनीलांजनं तुल्यमाहिफेनं समांशकं
।ही६ पञ्चानां लवणानां च भागमेकं विमर्द्दयेत्॥ वज्रीरसैर्दिनैकं तु रुद्ध्वा तं मृधरे पचेत्। माषैकमार्द्रकद्रावैर्लेहनाद्वातनाश
नं। पिप्पलीमूलजं क्वाथं सकृष्णमनुपाययेत्। सर्वोन्वातविकारांश्च हन्याद्दीपकादिकान्। ॥अथ कनकसुन्दरो रसः॥ कन
कस्याष्टशाणाः स्युः सूते द्वादश शाणकाः। गंधोऽपि द्वादशः प्रोक्तः ताम्रं शाणद्वयोन्मितम्॥ अभ्रकं स्याच्चतुःशाणं माक्षिकं च
द्विशाणिकं। वङ्गो द्विशाणः सौवीरं त्रिशाणं लोहमष्टकं। विषं त्रिशाणिकं कुर्यात् ह्यारुःलीपलं संमितं। मर्द्दयेद्दिनमेकं
तु रसैरम्लफलोद्भवैः। दत्वा लघुपुटं वन्हौ ततः शुद्धं विचूर्णयेत्। माषमात्रो रसो देयः सन्निपाते सुदारुणे। आर्द्रकस्य रसेनैव रसो रा.म॰
नस्य रसेन वा। किलासं सर्वकुष्ठानि विसर्प्पं च भगंदरं। ज्वरं गरमजीर्णं च जयेद्रोगहरो रसः॥ ॥अथ सन्निपातभैरवो रसः॥ ४१

रसोगंधस्त्रिकर्षौकुर्यात्कज्जलिकांद्वयोः॥ताराभ्रतालाभ्रवंगाहिंसाराश्चैकैककार्षिकाः।शिग्रुज्वालामुखीशुंठीविल्वमातुलुंगीपक्व
स्यात्१ ताप्रत्येकंस्वरसैःकुर्याद्यामद्वयंहिमर्द्दनम्।कृत्वागोलंहृतंवस्त्रेर्लवणपूरितेन्यसेत।काचभाण्डेततःस्थाल्यांकाचकूपीनिवेशयेत।वा
लुकाभिःप्रपूर्याथवन्हिर्यामद्वयंभवेत।ततउद्धृत्यतंगोलंचूर्णयित्वाविमिश्रयेत।प्रवालचूर्णकर्षैकंशाणमात्रंविषेणच।कृ
ष्णसर्पस्यगरलेर्द्विवेलंभावयेत्तथा।नागरंमुसलीमांसीहेमाह्वावेतसःकणा।नीलिनीपत्रकंचैलाक्षिप्रकस्थकुठेरकः।धात
पुष्पाःस्वदालीधत्तूरनागत्वमुण्डिकाः।मधुकजातीमदनारसैर्भावितमर्द्दयेत।प्रत्येकमेकवेलंचततःसंशोष्यधारयेत।बीज
पूरार्द्रकद्रावैर्मरिचैःषोडशोन्मितैः।रसोद्विगुञ्जप्रमितःसन्निपातेषुदीयते॥प्रसिद्धोऽयंरसोनाम्नासन्निपातस्यभैरवः॥ ॥अथ
ग्रहणीकपाटः॥तारमौक्तिकहेमानिसारश्चैकैकभागिकः।द्विभागोगन्धकःसूतस्त्रिभागोमर्द्दयेद्दिमानाकपित्थस्वरसैर्गाढंमृगशृ
ङ्गंततःक्षिपेत।पुटेन्मृत्पुटेनैवततउद्धृत्यमर्द्दयेत।वलारसैःसप्तवेलमपामार्गरसैस्त्रिधा।लोध्रप्रतिविषामुस्तधातकीन्द्रयवामृताः
।प्रत्येकमेषांस्वरसैर्भावनाःस्युस्त्रिधात्रिधा।माषमात्रोरसोदेयोमधुनामरिचैस्तथा।हन्यात्सर्वानतीसारान्ग्रहणींसर्वजामपि
।कपाटोग्रहणीरोगेरसोऽयंवन्हिदीपनः॥ ॥अथग्रहणीवज्रकपाटः॥मृतसूताभ्रकंगंधंयवक्षारंसटंकणं।अग्निमन्थवचांकु
र्यान्मृततुल्यानिमान्सुधीः।ततोजयन्तीजंवीरभृङ्गद्रावैर्विमर्द्दयेत।त्रिवासरंततोगोलंकृत्वासंशोष्यधारयेत।लोहपात्रेशरावं
चदत्वोपरिविमुद्रयेत।अधोवन्हिंशनैःकुर्याद्यामार्द्धंततउद्धरेत।रसतुल्यांप्रतिविषांदद्यान्मोचरसंतथा।कपित्थविजयाद्रावै
र्भावयेत्सप्तधाभिषक्।धातकीन्द्रयवामुस्तंलोध्रंविल्वंगुडूचिका।एतद्द्रसैर्भावयित्वावैलेकैकंचशोषयेत।रसंवज्रकपाटाख्यं

शार्ङ्ग शाणोकं मधुनालिह्यात् वह्निशुंठी विडं विल्वं लवणं चूर्णयेत्समं। पिबेदुष्णाम्बुना चानु सर्वजां ग्रहणीं जयेत्॥ ॥अथ मदनकामदेवो रसः॥
४३ तारं वङ्गं सुवर्णं च ताम्रं सूतं च गन्धकं। लोहं क्रमविवृद्धानि कुर्यादेतानि मात्रया। विमर्द्य कन्यकाद्रावैर्न्यसेत्काचमये दृढे। विमृद्य पिठरीमध्ये धा
रयेत्सैन्धवैर्भृते। पिठरीं मुद्रयेत्सम्यक् ततश्चुल्ल्यां निवेशयेत्। वह्निं शनैः शनैः कुर्याद्दिनैकं तत उद्धरेत्। स्वाङ्गशीतं च संचूर्ण्य भावयेद्दर्द्धि
दुरधकैः। अश्वगन्धा च काकोली वानरी मुशली क्षुरा। त्रिवल्लरसैरासां शतावर्याश्च भावयेत्। पद्मकंदकसेरूणां रसैः काशस्य भावयेत्।
केसरी मोचकर्पूरकं क्षौ लेला लवङ्गकं। पूर्वचूर्णाद्दशांशमेतच्चूर्णं विमिश्रयेत्। सर्वैः समां शर्करां च दत्वा शाणोन्मितं पिबेत्। गोदुग्धद्वि
पलेनैव मधुराहाररसेवकः॥ अस्य प्रभावात्तेजो दर्पं बलं नेत्रं मित्रं वर्द्धते। तरुणी रमयेद्बह्वीर्न च हानिः प्रजायते॥ ॥अथ कन्दर्पसुन्दरो
नामरसः॥ सूतो वज्रमहि मुक्तातारं हेम सिताभ्रकं। रसैः कर्षोन्मितान्येतान्मर्द्दयेद्दिशिमर्द्दजैः। प्रवालचूर्णं गन्धश्च द्विद्विकर्षं विमिश्रये
त्। ततो अगस्त्यरसैर्विमर्द्य मगधाटङ्कं। क्षिप्त्वा मृदुपुटे पक्वा भावयेत्स्वातकीरसैः। काकोली मधुकं वासी बलात्रयविशंगुदं द्राक्षा
पिप्पलवन्दाकं वरी पर्णी चतुष्टयं। पञ्चपकं कसेरुश्च समक्षकं वानरी तथा। भावयित्वा रसैरेषां शोषयित्वा विचूर्णयेत्। एलात्वक्पत्रकं
मांसी लवंगागुरुकेसरं। मुस्तं मृगमदं ह्रस्वां जलं चन्दनं विमिश्रयेत्। एतच्चूर्णैः शाणमितैः रसकं दर्शमुंदरं॥ खादेच्छाणमितं रात्रौ सिता
धात्री विदारिका एतासां कर्षचूर्णं नरस्पिबेः कर्षेण संयुतं। तस्यानु द्विपलं क्षीरं पिबेत्सुखितमानसः। स्त्रीशुपार रमयेद्बह्वीर्न्न हानिं का
पि गच्छति॥ ॥अथ पलेन्द्ररसायनम्॥ शुद्धं रसं द्विभागैकं द्विभागं शुद्धगन्धकं। क्षिपेत्कज्जलिकां कुर्यात्तत्र तीक्ष्ण मवरजः। क्षिप्त्वा कज्ज रा.सं.
लिकातुल्यं प्रहरैकं विमर्दयेत्। ततः कन्यादृवैर्घर्म्मे त्रिदिनं परिमर्दयेत्। ततः [illegible] ॥अथ [illegible] तिन्दिंतं कृत्वा ४३

ततः कन्यादुवेर्घर्मे त्रिदिनं परिमर्दयेत ॥ ततः संजायते तस्य सोष्माधमो द्रुमो महान् ॥ अथ तत्पिंडितं कृत्वा ताम्रपात्रे निधा
पयेत् ॥ मध्ये धान्यकुशूलस्य त्रिदिने धारयेद्बुधः ॥ उद्धृत्य तस्मात् खल्वे च क्षिप्त्वा घर्मे निधाय च ॥ रसैः कुठारच्छिन्नाया स्त्रिवेलं
परिभावयेत् ॥ संशोष्य घर्मे क्वाथेन भावयेत् त्रिकटोस्त्रिशः ॥ वासामृता चित्रकाणां रसैर्भार्गी पृथक् त्रिशः ॥ लोहपात्रे ततः क्षिप्त्वा
भावयेत् त्रिफलाजलैः ॥ निर्गुण्डी हाडिमत्वग्भिर्विषमुष्टिकरुंटकैः ॥ पलाशकदलीद्राक्षावेधीजकस्यशतेन च ॥ नीली
कालंबुपाद्राववेर्बलफलिकारसैः ॥ भावयेत् त्रिस्त्रिवेलं च ततो नागबलारसैः ॥ शतावरीगोक्षुरभिः पातालगरुडीद्रवैः
त्रिवेलं च यथालाभं भावयेदेभिरौषधैः ॥ ततः प्रातर्लिहेदाज्यमधुभ्यां कोलमात्रकं ॥ पलमात्रं बलाक्वाथं पिबेदस्यानुपा
नकं ॥ मासत्रयं शीलितं स्याद्वलीपलितनाशनं ॥ मन्दाग्निं श्वासकासौ च पांडुतां कफमारुतौ ॥ पिप्पलीमधुसंयुक्तं हन्या
देतन्न संशयः ॥ वातासृग्मूत्रदोषांश्च ग्रहणीं तोयजां रुजं ॥ अर्शांसि षड्विधं जयेदेतच्छिन्नासत्वमधुप्लुतं ॥ बलवर्णकारं वृष्य
मायुष्यंपर [illegible] संस्कृतं ॥ जयेत् सर्वामयान्कोलमितं लोहरसायणं ॥ प्रहेयोषधमेतत् स्निग्धं दद्यात् कोलमात्रकं ॥ कृष्माण्डं ति
लैस्तैलं च माषान्नं शाकं तथा ॥ मद्यमम्लरसं चैव त्यजेल्लोहस्य सेवकः ॥ ॥ इति श्रीदामोदरसूनुनाशार्ङ्गधरेण विरचि
तायां संहितायां चिकित्साख्याने रसकल्पनाविधिरध्यायः ॥ ॥ मध्यमखंडः ॥ ॥ स्नेहस्य तु द्विधा योनिः घृतं तैलं च सात
था ॥ मज्जावसां पिबेत्सर्पिः किंचिद्वलदितरश्चोऽस्यावरो जंगमश्चैवं द्वियोनिः स्नेह उच्यते ॥ तिलतैलं स्थावरेषु जंगमेषु घृतं

क्षाराम्लं तिलतैलं च माषान्नं राजिकां तथा। मद्यमम्लरसं चैव त्यजेल्लोहस्य सेवकः॥ ॥इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचित
यां संहितायां चिकित्सास्थाने रसकल्पनाविधिर्नामाध्यायः॥१२॥ ॥मध्यमखंडः॥ ॥स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा। मज्जा च तं
पिबेन्मर्त्यः किंचिदभ्युदिते रवौ। स्थावरो जंगमश्चैव द्वियोनिः स्नेह उच्यते। तिलतैलं स्थावरेषु जंगमेषु घृतं वरं। द्वाभ्यां त्रिभिश्चतु
र्भिस्तु यमकैः त्रिवृतो महान्। पिबेत्त्र्यहं चतुरहं पंचाहं षडहानि वा। सप्तरात्रात्परं स्नेहः सात्मीभवति सेवितः। दोषकालाग्निवय
सां बलं दृष्ट्वा प्रयोजयेत्। हीना च मध्यमा ज्येष्ठा मात्रा स्नेहस्य बुद्धिमान्। अमात्रया तथाकाले मिथ्याहारविहारतः। स्नेहः करो
ति शोफार्शस्तन्द्रानिद्राविसंज्ञताः॥ दद्याद्दीप्ताग्नये मात्रा स्नेहस्य पलसंमिता। मध्यमाय त्रिकर्षा स्याज्जघन्याय द्विकार्षिकी। अ
थवा स्नेहमात्राः स्युस्तिस्रो मात्राः सर्वसम्मताः। अहोरात्रेण महती जीर्यत्यन्हि तु मध्यमा। जीर्यत्यल्पा दिनार्द्धे च सा विज्ञेया सुखा
वहा। अल्पा स्याद्दीपनी वृष्या स्वल्पदोषे च पूजिता। मध्यमा स्नेहनी ज्ञेया बृंहणी श्रमहारिणी। ज्येष्ठा कुष्ठविषोन्मादग्रहापस्मारना
शिनी॥ केवलं पैत्तिके सर्पिर्वातिके लवणान्वितं। देयं बहुकफे वन्हिव्योषक्षारसमन्वितं॥ रूक्षक्षतविषार्त्तानां वातपित्तविका
रिणां। हीनमेधास्मृतीनां च सर्पिःपानं प्रशस्यते॥ कृमिकोष्ठानिलाविष्टाः प्रवृद्धकफमेदसः। पिबेयुस्तैलसात्म्या ये तैलं दार्ढ्यार्थि
यस्तु ये॥ व्यायामकर्शिताः शुष्करेतोरक्ता महारुजः। महाग्निमारुतप्राणा वसायोग्या नराः स्मृताः। क्रूराशयाः क्लेशसहा वातार्त्ता रा.म.
दीप्तवन्हयः। मज्जानं च पिबेयुस्ते सर्पिर्वा सर्वतो हितं। शीतकाले दिवा स्नेहमुष्णकाले पिबेन्निशि। वातपित्ताधिके रात्रौ वातश्लेष्माधि ४५

इससंयुक्तकर्णि

केदिवा। नस्याभ्यञ्जनगण्डूषमूर्द्धकर्णाक्षितर्पणे। तैलं घृतं वा युञ्जीत दृष्ट्वा दोषबलाबलम्॥ घृते कोष्णं जलं पेयं तैले यूषः प्रश
स्यते। वसामज्ज्ञोः पिबेन्मण्डमनुपानं सुखावहं॥ स्नेहद्विषः शिशून्वृद्धान्सुकुमारान्कृशानपि। तृष्णालुकानुष्णकाले सहभक्तेन पाय — गवां३
येत॥ सपिप्पली बहुतिला यवागूः स्वल्पतण्डुला। सुखोष्णा सेव्यमाना तु सद्यः स्नेहनुकारिणी॥ शर्कराचूर्णसंस्पृष्टे दोहनस्थे घृते तु गो॥
दुग्धाक्षीरं पिबेद्दूनः सद्यः स्नेहनमश्नुते। मिथ्याचाराद्बहुत्वाद्वा यस्य स्नेहो न जीर्यति। विष्टभ्य चापि जीर्येत वारिणोष्णेन वामयेत॥
स्नेहस्याजीर्णशंकायां पिबेदुष्णोदकं नरः। ततोद्गारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा॥ स्नेहे नये निकस्याग्निर्यदा तीक्ष्णतरीकृतः। तदा
सोऽदीरयेत्तृष्णां विषमां तस्य पाययेत्। शीतं जलं वा सपेन्न पिपासा ते नश्यति॥ अजीर्णी [illegible] स्नेहमुदरी तरुणज्वरी। दुर्बलोऽरो
चकी स्थूलो मूर्छितो मद्यपीडितः। दत्तबस्तिर्विरिक्तश्च वान्तस्तृष्णाश्रमान्वितः। अकालप्रसवा नारी दुर्दिने च विवर्जयेत्॥ स्नेह्याः शोध्य
मद्यस्त्रीव्यायामासक्ताश्चिन्तकाः वृद्धबालकृशा रूक्षाः क्षीणास्राः क्षीणरेतसः। वातार्त्तास्तिमिरार्त्ता ये ते योग्याः स्नेहने मताः॥ वातानुलोम्यं
दीप्ताग्निर्वर्चः स्निग्धमसंहतम्। मृदु स्निग्धाङ्गता ग्लानिः स्नेहोद्वेगोऽथ लाघवम्। विमलेन्द्रियता सम्यक् स्निग्धे रूक्षे विपर्ययः॥ भक्तद्वे
षो मुखस्रावो गुदे दाहः प्रवाहिका। तन्द्रातिसारः पाण्डुत्वमभृशं स्निग्धस्य लक्षणम्॥ स्नेहस्य स्नेहने दोषे रतिस्निग्धस्य रूक्षणम्। श्या
माकचणकाद्यैश्च तक्रपिण्याकसक्तुभिः॥ दीप्ताग्निः शुद्धकोष्ठश्च पुष्टधातुर्दृढेन्द्रियः। निर्जरो बलवर्णाढ्यः स्नेहसेवी भवेन्नरः॥
स्नेहव्यापत्समं संशीतवेगाघातप्रजागरान्। दिवास्वप्नमभिष्यन्दि रूक्षान्नं च विवर्जयेत्॥ ॥इति श्री दामोदरसूनुना शार्ङ्गधरेण

शार्ङ्ग
४५

विरचितायां संहितायां चिकित्सास्थाने स्नेहपानविधिरध्यायः ॥३२॥ अथ स्वेदविधिः ॥ स्वेदश्चतुर्विधः प्रोक्तस्तापोष्मस्वेदसंज्ञितः ॥ उप
नाहो द्रवस्वेदः सर्वे वातार्तिहारिणः ॥ स्वेदौ तापोष्मजौ प्रायः श्लेष्मघ्नौ समुदीरितौ ॥ उपनाहस्तु वातघ्नः पित्तसंसर्गतो हितः ॥ महाबले महाव्याधौ
शीते स्वेदो महान्स्मृतः ॥ दुर्बले दुर्बलः स्वेदो मध्यमे मध्यमो मतः ॥ बलासे रूक्षणः स्वेदः स्निग्धरूक्षः कफानिले ॥ कफमेदोवृते वाते कोष्णगेहं
रवेः करान् ॥ नियुद्धं मार्गगमनं गुरुप्रावरणं क्षुधं ॥ विना व्यायाममासां च समं वैताम यत्नतः ॥ येषां न संक्षिधानत्वं वक्तिष्ठापि हि देहिना
म ॥ शोधनीयाश्च ये केचित्पूर्वं स्वेद्यास्ते मताः ॥ स्वेद्याः पूर्वं त्रयोपीह भगन्दर्यर्शसस्तथा ॥ अश्मर्या वातरोगजन्तुः समये शस्त्रकर्मणः
॥ पश्चात्स्वेद्या हृते शल्ये मूढगर्भा गते तथा ॥ काले प्रजाता काले वा पश्चात्स्वेद्या नितंबिनी ॥ सर्वान्स्वेदान्निवाते च जीर्णान्नेनावचार —र्णाहारे च कारयेत् ९
येत् ॥ स्वेदात्तु स्थिता दोषाः स्नेहक्लिन्नस्य देहिनः ॥ द्रवत्वं प्राप्य कोष्ठान्तर्गत्वा यांति विरेकताम् ॥ स्नेहाभ्यक्तशरीरस्य शीतैराच्छाद्य चक्षुषी
॥ स्वेद्यमानस्य च मुहुर्हृदयं शीतलैः स्पृशेत् ॥ अजीर्णी दुर्बलो मेही क्षतक्षीणः पिपासितः ॥ अतीसारी रक्तपित्ती पाण्डुरोगी तथोदरी ॥ म
दार्त्ता गर्भिणी चैव न हि स्वेद्या विजानता ॥ स्वेदाद्देषां यान्ति देहा विनाशं नो साध्यत्वं यान्ति चैषां विकाराः ॥ एतानपि महद्दुःखे स्वेदसाध्यानुपा
चरेत् ॥ मृदुस्वेदं प्रयुञ्जीत तथा हृन्मुष्कदृष्टिषु ॥ अतिस्वेदात्संधिपीडा दाहः स्फोटक्लमो भ्रमः ॥ पित्तास्रक्पिडकाकोपस्तत्र शीतैरुपाचरेत् ॥
तेषु तापाभिधः स्वेदो वालुकावस्त्रपाणिभिः ॥ कपालकंडुकांगारैर्यथायोग्यं प्रकल्पयेत् ॥ उष्मस्वेदः प्रयोक्तव्यो लोहपिंडेष्टिकादिभिः ॥ शा.म.
प्रतप्तैरम्लसिक्तैश्च कापलैर्नवस्त्रकैर्वेष्टितैः ॥ अथवा वातनिर्णाशिद्रव्यक्वाथप्रसादिभिः ॥ उष्मस्वेदं दापयित्वा पार्श्वे छिद्रं विधाय च ॥ विमुच्या ४५

सवित्रिवेदां च धातुजां काष्ठजां मृत्ताजडंगुलास्यां कूपं कुम्भीं नाडीं पुरुषार्द्धहस्तिकाम् सुखोपविष्टस्य सर्वाङ्गं गुरुप्रावरणावृते हस्तिशुण्डिकया ना
ड्या स्वेदयेद्वातरोगिणः। पुरुषायाममात्रां वा भूमिमुत्कीर्य खादिरैः। काष्ठैर्दग्ध्वा तथाभ्युक्ष्य क्षीरधान्याम्लवारिभिः। वातघ्नपत्रैराच्छाद्य श
यानं स्वेदयेन्नरम्।। एवं माषादिभिः स्विन्नैः शयानं स्वेदमाचरेत्।। तथोपनाहस्वेदं च कुर्याद्वातहरौषधैः। प्रलिप्य देहं वातार्त्तं क्षीरमांस
रसान्वितैः। अम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैः।। उतग्राम्यानूपमांसैर्जीवनीयगणेन च। दधिसौवीरकक्षीरैर्वीरतर्वादिना
तथा। कुलत्थमाषगोधूमैरतसीतिलसर्षपैः। शतपुष्पादेवदारुशेफालीस्थूलजीरकैः।। एरण्डमूलबीजैश्च रास्नामूलकशिग्रुभिः। मि
शिकृष्णाकुठेरैश्च लवणैरम्लसंयुतैः। प्रसारण्यश्वगन्धाभ्यां बलाभिर्दशमूलकैः। गुडूच्या वानरीबीजैर्यथालाभं समाहृतैः। क्षुण्णैः स्वि
न्नैश्च वस्त्रेण वेष्टैः संस्वेदयेन्नरम्। महाशाल्वणसंज्ञोऽयं योगः सर्वानिलार्त्तिहृत्।। द्रवस्वेदस्तु वातघ्नैः द्रव्यक्वाथेन पूरिते। कटाहे को
ष्ठके वापि सम्प्रविष्टोऽवगाहयेत्। सौवर्णं राजतं वापि ताम्रमायसदारुजं। कोष्ठकं तत्र कुर्वीत छायेपवष्ट्रिंशाद्ङ्गुलमात्रायामत
वे देवस्याद्वेनुष्कं समस्तणं तथा। नाभेः षडङ्गुलं यावन्मग्नः क्वाथस्य धारया। कोष्णया स्कन्धयोः सिक्तस्तिष्ठेत्स्निग्धतनुर्नरः। एवं तै
लेन दुग्धेन सर्पिषा स्वेदयेन्नरम्। एकान्तरो द्व्यन्तरो वा स्नेहो युक्तोऽवगाहने।। शिरामुखैर्लोमकूपैर्धमनीभिश्च तर्पयन्। शरीरे
बलमाधत्ते युक्तः स्नेहोऽवगाहने। जलसिक्तस्य वर्द्धन्ते यथामूलेंकुराद्रुमः। तथा च धातुवृद्धिर्हि स्नेहसिक्तस्य जायते। नातः परतरः कश्चि
दुपायो वातनाशनः। शीतशूलव्युपरमे स्तम्भगौरवनिग्रहे। दीप्तेऽग्नौ मार्दवे जाते स्वेदनाद्विरतिर्मता। सम्यक्स्विन्नं विमृदितं स्नातमु
ष्णाम्बुभिः शनैः। भोजयेच्चानभिष्यन्दि आयामं न च कारयेत्।। ।।इति श्रीदामोदरसूनुशार्ङ्गधरेण

रुच्यते॥

धिरचितायां संहितायां चिकित्सास्थाने स्नेहविधिरध्यायः॥ ३॥ अथ वमनविधिः॥ ॥शरत्काले वसन्ते च प्रावृट्काले च देहिनाम॥
वमनं रेचनं चैव कारयेत्कुशलो भिषक्॥ बलवन्तं कफव्याप्तं हृल्लासादिनिपीडितम॥ तथा वमनसात्म्यं च धीरचित्तं च वामयेत॥ विषदो-
षे स्तन्यरोगे मन्दाग्नौ श्लीपदेऽर्बुदे। हृद्रोगे कुष्ठवीसर्पे मेहाजीर्णभ्रमेषु च। विदारिकापचीकासश्वासपीनसवृद्धिषु। अपस्मारे ज्व-
रोन्मादे तथा रक्तातिसारिणाम। नासाताल्वोष्ठपाके च कर्णस्रावेऽधिजिह्वके। गलशुण्ड्यामतीसारे पित्तश्लेष्मगदे तथा। मेदोगदे
शिरःशूले तथा मूर्द्धं द्वमेदके॥ मघोज्वरे रुचौ चैव वमनं कारयेद्भिषक्॥ न वामनीयस्तिमिरी न गुल्मी नोदरी कृशः॥ नाति
वृद्धो गर्भिणी च न स्थूलो न क्षतातुरः। मदार्त्तो बालको रूक्षः क्षुधितश्च निरूहितः। उदावर्त्त्यूर्द्ध्वरक्ती च दुःछर्द्दिः केवलानिली
पांडुरोगी कृमिव्याप्तः पवनात्स्वरघातकः॥ एतेप्यजीर्णव्यथिता वाम्या ये विषपीडिताः॥ कफव्याप्ताश्च ते वाम्या मधुकक्वा-
थपानतः॥ सुकुमारं कृशं बालं वृद्धं भीरुं च वामयेत। पाययित्वा यवागूं वा क्षीरतक्रदधीनि वा। असात्म्यैः श्लेष्मलैर्भोज्यैर्दो-
षानुत्क्लेश्य देहिनः। स्निग्धस्विन्नाय वमनं दत्तं सम्यक्प्रवर्त्तते॥ वमनेषु च सर्वेषु सैन्धवं मधु वा हितं। बीभत्सं वमनं दद्याद्वि-
परीतं विरेचनं॥ क्वाथ्यद्रव्यस्य कुडवं श्रपयित्वा जलाढके। अर्द्धभागावशिष्टं च वमनेष्ववचारयेत। क्वाथपाने नवप्रस्था ज्येष्ठा
श्रेष्ठ मात्रया
मात्रा प्रकीर्त्तिता। मध्यमा षड्मिता प्रोक्ता त्रिप्रस्था च कनीयसी॥ कल्कचूर्णावलेहानां त्रिपलं मात्रयोत्तमम॥ मध्यमं द्विप-
लं विद्यात्कनीयः पलमुच्यते॥ वमने चाष्टवेगाः स्युः पित्तान्ता उत्तमा स्मृता। षड्वेगा मध्यमा वेगाश्चत्वारस्त्ववरे मताः॥ वम-
ने च विरेके च तथा शोणितमोक्षणे। अर्द्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः॥ कफं कटुकतीक्ष्णोष्णैः पित्तं स्वादुहिमैर्ज-

-रश्चोपि त्तांतउत्तमाः॥२ -पीत्वा यवागूं यथाकंठं क्षीरतक्रदधीनि वा॥९

यत॥ सन्धाहु लवणाम्लोष्णैः संसृष्टं वायुनाकफे॥ कृष्णां राठफलं सिंधुं कफे कोष्णजलैः पिबेत॥ पटोलवासानिम्बैर्वा छ्वपित्ते शी
तजलैः पिबेत॥ सश्लेष्मवातपीडायां सक्षीरं मदनं पिबेत॥ अजीर्णे कोष्णपानीयं पित्ति श्रु पीत्वा वमेत्सुधीः॥ वमनं पाययित्वा च
जानुमात्रासने स्थितं॥ कंठमेरंडनालेन स्पृष्ट्वा तं वामयेद्भिषक्॥ प्रसेको हृद्ग्रहः कोठः कंडूर्दुःखुर्द्दितं भवेत॥ अतिवान्तो भवे
न्तृष्णा हिक्कोन्मादो विसंज्ञताः॥ जिह्वानिःसरणं चाक्ष्णोर्व्यावृत्तिर्हनुसंहतिः॥ रक्तछर्द्दिः ष्ठीवनं च कंठपीडा च जायते॥ — न्व४
वमनस्यातियोगेन तु मृदु कुर्याद्विरेचनम्॥ वमनोत्तः प्रविष्टायां जिह्वायां कवलग्रहः॥ स्निग्धाम्ललवणैर्हृद्यैर्घृतक्षीरर
सैर्हितः॥ फलान्यम्लानि खादेयुस्तस्याग्रेतो नराः॥ निःसृतां तु तिलद्राक्षाकल्कलिप्तां प्रवेशयेत॥ व्यावृत्तेक्ष्णि
घृताभ्यक्ते पीडयेच्च शनैः शनैः॥ हनुमोक्षे स्मृतः स्वेदो नस्यं च श्लेष्मवातहृत॥ रक्तपित्तविधानेन रक्तछर्द्दिमुपाचरेत॥ धात्री
रसांजनोशीरलाजचन्दनवारिभिः॥ मंथं कृत्वा पाययेच्च सघृतं क्षौद्रशर्करम्॥ शाम्यत्येतेन तृड्दाहाः पीडा मूर्छा छर्दिसमुद्भ
वाः॥ हृत्कंठशिरसां शुद्धिर्दीप्ताग्नित्वं च लाघवम्॥ कफपित्तविनाशश्च सम्यग्वान्तस्य चेष्टितं॥ ततोऽपराह्णे दीप्ताग्निं मु
द्गषष्टिकशालिभिः॥ हृद्यैश्च जाङ्गलरसैः कृत्वा यूषं च भोजयेत॥ तन्द्रालिङ्गास्यदौर्गन्ध्यं कण्डूश्च ग्रहणीविषं॥ सुवान्त
स्य न पीडायै भवन्त्येते कदाचन॥ अजीर्णं शीतपानीयं व्यायामं मैथुनं तथा॥ स्नेहाभ्यङ्गं प्रकोपं च दिनैकं वर्जयेत्सुधीः॥ ॥
॥ इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने वमनविधिरध्यायः॥ ३॥ अथ विरेचनविधिः॥

=कामार्त्तो मार्गविश्रान्तः कृशोतिसुकुमारकः॥ क्षुधार्तस्तृषितः क्लिन्नः ह्रपी स्थूलश्च गर्भिणी॥ नवज्वरी प्रसूता च
मन्दाग्निश्च मदात्ययी॥५

नस्य नस्य वांतस्यत्वधःस्रस्तो

शार्ङ्ग स्निग्धस्विन्नाय वान्ताय दद्यात्सम्यग्विरेचनम॥ अवामितस्य स्रस्तो वै ग्रहणीं छादयेत्कफः॥ मन्दाग्निं गौरवं कुर्याज्जनये-
४७ द्वाप्रवाहिकाम॥ अथवा पाचनैरामं बलासं च विपाचयेत॥ स्निग्धस्य स्नेहनैः कार्यं स्वेदैः स्विन्नस्य रेचनम॥ शरद्धौ वसन्ते च
देहशुद्धौ विरेचयेत॥ अन्यदात्ययिके कार्ये शोधनं शीलयेद्बुधः॥ पित्ते विरेचनं युंज्यादामोद्भूते गदे तथा॥ उदरे च तथाध्मा-
ने कोष्ठशुद्धौ विशेषतः॥ दोषाः कदाचित्कुप्यन्ति जिता लंघनपाचनैः॥ ये तु संशोधनैः शुद्धा न तेषां पुनरुद्भवः॥ बालवृद्धा-
वतिस्निग्धः क्षताक्षीणभयान्वितः॥ श्रान्तस्तृषार्त्तः स्थूलश्च गर्भिणी च नवज्वरी॥ नवप्रसूता नारी च मन्दाग्निश्च मदात्ययी
॥शल्यार्दितश्च रूक्षश्च न विरेच्या विजानता॥ जीर्णज्वरी गरव्याप्तो वातरक्ती भगन्दरी॥ अर्शः पाण्डूदरग्रन्थिहृद्रोगारुचिपी-
डिताः॥ योनिरोगप्रमेहार्त्तो गुल्मप्लीहव्रणार्दितः॥ विद्रधिच्छर्दिविस्फोटविषूचीकुष्ठसंयुतः॥ कर्णनासाशिरोवक्त्रगुदमेहाम-
यान्वितः॥ प्लीहशोथाक्षिरोगार्त्तः कृमिक्षारानिलार्दिताः॥ शूलिनो मूत्रघातार्त्ता विरेकार्हा नरा मताः॥ बहुपित्तो मृदुः प्रोक्तो बहुश्ले-
ष्मा च मध्यमः॥ बहुवातः क्रूरकोष्ठो दुर्विरेच्यः स कथ्यते॥ मृद्वी मात्रा मृदौ कोष्ठे मध्यकोष्ठे च मध्यमा॥ क्रूरे तीक्ष्णा मता द्रव्यैर्मृदुम-
ध्यमतीक्ष्णकैः॥ मृदुर्द्राक्षापयश्चञ्चुतैलैरपि विरिच्यते॥ मध्यमस्त्रिवृतातिक्ताराजवृक्षैर्विरिच्यते॥ क्रूरः स्नुक्पयसहेमक्षीरी
दन्तीफलादिभिः॥ मात्रोत्तमा विरेकस्य त्रिंशद्वेगैः कफान्तका॥ वेगैर्विंशतिभिर्मध्या हीनोक्ता दशवेगकैः॥ द्विपलं श्रेष्ठमा- राम०
ख्यातं मध्यमं च पलं भवेत॥ पलार्द्धं च कषायाणां कनीयस्तु विरेचनम॥ कल्कमोदकचूर्णानां कर्षं मध्वाज्यलेहतः॥ कर्ष ४७

नजाजी सरलं च वा॥ हेमन्ते शिशिरे चैव हेमन्ते चूर्णमुष्णाम्बुना पिबेत्॥४

द्वयं पलं वा पिबेद्योरोगाद्यपेक्षया॥ पिबेत्तैलेन रूक्षस्तु तीक्ष्णाद्यं हिंस्र पिबेत्॥ त्रिफलाक्वाथगोमूत्रैः पिबेद्व्योषं कफार्दितः॥ स्नेहैस्तैर्यवक्षीरेण
क्षीरमस्तुभिः पिबेन्नरः॥ वातार्दितो विरेकार्थं कटुकं लाभं रसेन वा॥ एरण्डतैलं त्रिफलाक्वाथेन द्विगुणेन वा॥ युक्तं पीतं पयोभिर्वा न चिरेण विरिच्यते॥ तैवृ
ताकोटजं बीजं पिप्पली विश्वभेषजम्॥ समं शर्कराद्रसं होषं पर्णकाले विरेचनम्॥ त्रिवृद्दुरालभामुस्तशर्करोदीच्यचन्दनं॥ द्राक्षाम्बुना सयष्ट्याह्वं शीत
तलेचयष्टिनात्वयो॥ पिप्पलीनागरं सिन्धुं श्यामां त्रिवृतं पासहॉलिहेत्क्षौद्रेण शिशिरे वसन्ते च विरेचनम्॥ त्रिवृता शर्करातुल्या ग्रीष्मकाले विरेचनमा
मयाभयाशिवं शुण्ठीविडङ्गामलकानि वा॥ पिप्पली पिप्पलीमूलं त्वक्पत्रं मुस्तमेव वा॥ एतानि समभागानि दन्ती च त्रिगुणा भवेत्॥ त्रिवृताष्टगुणा ज्ञेया
षड्गुणा चात्र शर्करा॥ मधुना मोदकान्कृत्वा कर्षमात्रान् ततो भक्षयेत्॥ (प्रमाणतः॥) [illegible] एकैकं भक्षयेत्प्रातः शीतं चानुपिबेज्जलं॥ तावद्विरिच्यते जन्तुर्यावदुष्णं न सेवते॥ यानाहारविहारेषु भवेन्नियंत्रणं सदा॥ विषमज्वरमन्दाग्निपाण्डुकासभगन्दरान्॥ दुर्नाममकु
ष्ठगुल्मार्शोगलगण्डभ्रमोदरान्॥ विदाहप्लीहमेहांश्च यक्ष्माणं नयनामयम्॥ वातरोगांस्तथाध्मानं मूत्रकृच्छ्राणि चाश्मरीं॥ पृष्ठपार्श्वो
रुजघनजङ्घोदररुजं जयेत्॥ सततं शीलनादेषां पलितानि प्रणाशयेत्॥ अभयामोदका ह्येते रसायनवराः स्मृताः॥ अभयामोदकाः॥ पीत्वा विरेचनं
शीतजलैः संसिच्य चक्षुषी॥ सुगन्धि किंचिदाघ्राय तांबूलं शीलयेद्बुधः॥ निवातस्थो न वेगांश्च धारयेन्न स्वपेत्तथा॥ शीताम्बु नस्पृशेत्क्वापि कोष्णं नी
रं पिबेन्मुहुः॥ बलासौ षधपित्तानि वायुर्वाभ्येत्यथा व्रजेत्॥ रेकान्तुथामलं पित्तं भेषजं च कफो व्रजेत्॥ दुर्विरिक्तस्य नाभेस्तु स्तब्धत्वं कुक्षिशू
लता॥ पुरीषवातसङ्गश्च कण्डूमण्डलगौरवम्॥ विदाहोऽरुचिराध्मानं भ्रमश्छर्दिश्च जायते॥ तं पुनः पाचनैः स्नेहैः पक्त्वा संस्निग्धं रेचयेत्तेन नास्य
पद्रवाः॥ तीक्ष्णाग्निर्लघुता भवेत्॥ विरेकस्यातियोगे तु मूर्छा भ्रंशो गुदस्य च॥ शूलं कफातियोगः स्यान्मांसधावनसंनिभम्॥ मेदोनिभं जलाभासं र

न्नं चापि विरिच्येत तस्य शीतांबुभिः सिक्त्वा शरीरं तंडुलाम्बुभिः । मधुमिश्रैस्तथा शीतैः कारयेद्वमनं मृदु ॥ सहकारत्वचः कल्को दध्ना सौवी
रकेण वा । पिष्टो नाभिप्रलेपेन हन्त्यतीसारमुल्बणं ॥ आजं ह्यैणं रसं वापि वैष्किरं हारिणं तथा । शालिभिः षष्टिकैः स्वल्पमसूरैर्वापि भोजन
। शीतैः संग्राहिभिर्द्रव्यैः कुर्यात्संग्रहणं भिषक् ॥ लाक्षावेधमसत्त्वं स्पृश्य जुलोमं गातेनि लो ॥ सुविरिक्तं नरं ज्ञात्वा पाचनं पाययेत्त्रिशो ॥ इं
द्रियाणां बलं बुद्धेः प्रसादो वह्निदीप्तिता । धातुस्थैर्यं वयःस्थैर्यं भवेद्रेचनसेवनात् ॥ प्रवातसेवी शीतांबु स्नेहाभ्यङ्गमजीर्णतां । व्यायामं मै
थुनं चैव न सेवेत विरेचितः ॥ शालिषष्टिकमुद्गाद्यैर्यवागूं भोजयेत्कृतं ॥ जांगलानां विष्किराणां वा रसैः शाल्योदनं हितम् ॥ ॥ इति श्रीदामो
दरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने विरेचनविधिरध्यायः ॥ ४ ॥ अथ वस्तिविधिः ॥ ॥ वस्तिर्द्विधानुवासाख्यो निरूह
श्च ततः परः । यः स्नेहैर्दीयते स स्यादनुवासननामकः ॥ कषायक्षीरतैलैर्यो निरूहः स निगद्यते ॥ वस्तिभिर्दीयते यस्मात्तस्माद्वस्तिरिति स्मृतः ॥ त
त्रानुवासनाख्यो हि वस्तिर्यः सोऽत्र कथ्यते । पूर्वमेव ततो वस्तिर्निरूहाख्योऽभिधीयते ॥ निरूहादुत्तरश्चैव वस्तिः स्यादुत्तराभिधः ॥ अनुवासनभे
दश्च मात्रावस्तिरुदीरितः । पलद्वयं तस्य मात्रा तस्माद्धीनापि वा भवेत् ॥ अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिली । नानुवास्यस्तु कुष्ठी स्या
न्मेही स्थूलस्तथोदरी ॥ नास्थाप्या नानुवास्याः स्युरजीर्णोन्मादतृड्युताः । शोकमूर्छारुचिभयश्वासकासक्षयातुराः ॥ नेत्रं कार्यं सुवर्णादि
धातुभिर्वृक्षवेणुभिः । नलैर्दन्तैर्विषाणाग्रैर्मणिभिर्वा विधीयते ॥ एकवर्षात्तु षड्वर्षं यावन्मानं षडङ्गुलं । ततो द्वादशकं यावन्मानं स्यादष्टस
म्मितम् । ततः परं द्वादशभिरङ्गुलैर्नेत्रदीर्घता ॥ मुद्गच्छिद्रं कलायाभं छिद्रं कोलास्थिरन्ध्रकम् । यथासंख्यं भवेन्नेत्रं श्लक्ष्णं गोपुच्छसंनिभ शा.सं. ४८
म् । आतुराङ्गुष्ठमानेन मूले स्थूलं विधीयते । कनिष्ठिकापरीणाहमग्रे च गुटिकामुखम् । तन्मूले कर्णिके द्वे च कार्ये भागाच्चतुर्थकात्

रसंसंयुक्तागर्भे

कं।१८

भोजयेत्तत्रवस्तिं च दद्याद्युक्तविधानतः ॥ मृगाजशूकरगवां महिषस्यापि वा भवेत् । मूत्रकोशस्य वस्तिस्तु तदलाभे तु चर्म्मजः । कषायरक्तः सु-
मृदुर्वस्तिः स्निग्धो दृढो हितः । व्रणवस्तेस्तु नेत्रं स्याच्छ्लक्ष्णमष्टाङ्गुलोन्मितं । मुद्गच्छिद्रं गृध्रपक्षनालिकापरिणाहि ॥ स्नेहः शरीरोपचयं वर्णं
बलमारोग्यमायुषः । कुरुते परिवृद्धिं च वस्तिः सम्यगुपासितः ॥ दिवा शीते वसन्ते च स्नेहवस्तिः प्रदीयते । ग्रीष्मवर्षाशरत्काले रात्रौ स्या-
दनुवासनम् । न चातिस्निग्धमशनं भोजयित्वानुवासयेत् । मदं मूर्छां च जनयेद् द्विधा स्नेहः प्रयोजितः ॥ रूक्षं भुक्तवतोऽत्यन्नं बलं वर्णं
च हापयेत् । युक्तस्नेहमतो जन्तुं भोजयित्वाऽनुवासयेत् ॥ हीनमात्रावुभौ वस्ती नातिकार्यकरौ स्मृतौ । अतिमात्रौ तथानाहक्लमातीसा-
रकारकौ ॥ उत्तमा स्यात्पलैः षड्भिर्मध्यमा स्यात्पलैस्त्रिभिः ॥ पलार्द्धेन हीना मात्रा प्रोक्ता मात्रानुवासने ॥ शताह्वासैंधवाभ्यां च देयं स्नेहे च चू-
र्णकं । तन्मात्रा उत्तमा मध्या स्यात्षट्चतुर्द्विमाषकैः ॥ विरेचनात्सप्तरात्रे गते जातबलाय च । भुक्तान्नायानुवास्याय वस्तिर्देयोऽनुवासनः ॥ अथानुवास्यं
स्वभ्यक्तमुष्णाम्बुस्वेदितं शनैः । भोजयित्वा यथाशास्त्रं कृतचंक्रमणं ततः ॥ उत्सृष्टानिलविण्मूत्रं योजयेत्स्नेहवस्तिना । सुप्तस्य वामपार्श्वेन वाम-
जंघाप्रसारिणः । कुंचितापरजंघस्य नेत्रं स्निग्धे गुदे न्यसेत् । बद्ध्वा वस्तिमुखं सूत्रैर्वामहस्तेन धारयेत् । पीडयेद्दक्षिणेनैव मध्यवेगेन धीर-
धीः ॥ जृम्भाकासक्षवादींश्च वस्तिकाले न कारयेत् । त्रिंशन्मात्रामितः कालः प्रोक्तो वस्तेस्तु पीडने । ततः प्रणिहिते स्नेहे उत्तानो वाक्शतं भ-
वेत् ॥ प्रसारितैः सर्वगात्रैर्यथा वीर्यं प्रसर्पति । ताडयेत्तलयोरेनं त्रींस्त्रीन्वारान्शनैः शनैः । स्फिजोश्चैवं ततः श्रोणीं शय्यां चैवोत्क्षिपेत्ततः ।
जाते विधाने तु ततः कुर्यान्निद्रां यथासुखं ॥ सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु । उपद्रवं विना शीघ्रं स सम्यगनुवासितः ॥ जीर्णान्नम-
थ सायाह्ने स्नेहे प्रत्यागते पुनः । लघ्वन्नं भोजयेत्कामं दीप्ताग्निस्तु नरो यदि ॥ अनुवासिताय दातव्यमितरेऽह्नि सुखोदकं । धान्यशुंठीकषा-

तत्र वामपार्श्वेन धारयेत् ॥ ५

शार्ङ्ग॰ मंबालेहमापन्निनाशनम्॥ अनेन विधिना षड्वा सप्त वाष्टौ नवापि वा॥ विधेया बस्तयस्तेषामन्ते चैव निरूहणम्॥ दत्तस्तु प्रथमो बस्तिः
४९ स्नेहयेद्बस्तिवंक्षणौ। सम्यग्दत्तो द्वितीयस्तु मूर्द्धस्थमनिलं जयेत्॥ बलं वर्णं च जनयेत्तृतीयस्तु प्रयोजितः॥ चतुर्थपञ्चमौ दत्तौ स्नेहयेतां रसासृ
जौ॥ षष्ठो मांसं स्नेहयति सप्तमो मेद एव च॥ अष्टमो नवमश्चापि मज्जानं च यथाक्रमम्॥ एवं शुक्रगतान्दोषान्द्विगुणः साधु सा
धयेत्॥ अष्टादशाष्टादशकान्बस्तीन्यो नियोजयेत्॥ स कुंजरबलोऽश्वस्य जवेन तुल्योऽमरप्रभः॥ रूक्षाय बहुवाताय स्नेहबस्तिं दिने दि
ने। दद्याद्वैद्यस्तथान्येषामग्न्याबाधभयात् त्र्यहात्॥ स्नेहोऽल्पमात्रो रूक्षाणां दीर्घकालमनत्ययः। तथा निरूहः स्निग्धानामल्पमात्रः प्र
शस्यते॥ अथ वा यस्य तत्कालं स्नेहो निर्याति केवलः। तस्यान्योऽल्पतरो देयो न हि स्निग्धस्यति ष्ठति। अशुद्धस्य मलोन्मिश्रः स्नेहो नै
-रौक्ष्या ७ ति यदा पुनः॥ तदाङ्गसदनाध्मानशूलं श्वासश्च जायते। पक्वाशये गुरुत्वं च तत्र दद्यान्निरूहणम्। तीक्ष्णं तीक्ष्णौषधैर्युक्तं फ
लवर्त्तिं हितां तथा वा॥ यथानुलोमनो वायुर्मलः स्नेहश्च जायते॥ तथा विरेचनं दद्यात्तीक्ष्णं नस्यं च शस्यते। यस्य नोपद्रवं कुर्यात्स्नेह
बस्तिरनिःसृतः। सर्वोऽल्पो वावृतो रौक्ष्यादुपेक्ष्यः स विजानता। अनायान्तमहोरात्रे स्नेहं संशोधनैर्हरेत्। स्नेहबस्तावनायाते ना
न्यः स्नेहो विधीयते। गुडूच्येरंडपूतीकभार्ङ्गीवृषकरोहिषं। शतावरीं सहचरं काकनासां पलोन्मितं। यवमाषातसीकोलकुलत्था
न्प्रसृतोन्मितान्। चतुर्द्रोणेऽम्भसः पक्त्वा द्रोणशेषेण तेन च। पचेत्तैलाढकं पिष्टैर्जीवनीयैः पलोन्मितैः॥ अनुवासनमेतद्धि सर्व
वातविकारनुत्॥ षट्सप्ततिर्व्यापदस्तु जायन्ते बस्तिकर्मणः। दूषितानां प्रमादेन ताश्चिकित्स्याः सुश्रुतात्। पानाहारविहा शा॰सं॰
राश्च परिहाराश्च कृत्स्नशः। स्नेहपानसमाः कार्या नात्र कार्या विचारणा॥ ॥इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां ४९

दससंयुक्तावर्त्तिर्न...
कं। नेत्र...
के...

संहितायां चिकित्सास्थाने स्नेहबस्तिविधिर्नामाध्यायः ॥ ७७ ॥ अथ निरूहणबस्तिविधिः ॥ ॥ निरूहबस्तिर्बहुधा भिद्यते कारणान्तरैः
तैरेव तस्य नामानि कृतानि मुनिपुङ्गवैः ॥ निरूहस्यापरं नाम प्रोक्तमास्थापनं बुधैः ॥ स्वस्थाने स्थापनाद्दोषधातूनां स्थापनं मतम् ॥
निरूहस्य प्रमाणं च प्रस्थः पादोत्तरः परः । मध्यमं प्रस्थमुद्दिष्टं हीनं च कुडवैस्त्रयः ॥ अतिस्निग्धोत्क्लिष्टदोषः क्षतोरस्कः कृशस्तथा ॥
आध्मानछर्दिहिक्कार्शः काशश्वासप्रपीडितः । गुदशोफातिसारार्त्तो विषूचीकुष्ठसंयुतः ॥ गर्भिणी मधुमेही च नास्थाप्याश्च ज
लोदरी । वातव्याधावुदावर्त्ते वातासृग्विषमज्वरे । मूर्छातृष्णोदरानाहमूत्रकृच्छ्राश्मरीषु चा ॥ वृद्ध्यसृग्दरमन्दाग्निप्रमेहेषु निरूह
णं । शूलेऽनिलपित्ते हृद्रोगे योजयेद्विधिवद्बुधः ॥ उत्क्लिष्टानिलविण्मूत्रं स्निग्धस्विन्नमभोजिनं । मध्याह्ने गृहमध्ये च यथायोग्यं निरूहये
त् । स्नेहबस्तिविधानेन बुधः कुर्यान्निरूहणम् । जाते निरूहे च ततो भवेदुत्कटकासनः ॥ तिष्ठेन्मुहूर्त्तमात्रं तु निरूहागमनेच्छया ॥ अना
याते मुहूर्त्ते तु निरूहं शोधनैर्हरेत् ॥ निरूहैरेव मतिमान्क्षारमूत्राम्लसैन्धवैः ॥ पुनः क्रमेण गच्छन्ति विट्पित्तकफवायवः ॥ लाघवं चो
पजायेत सुनिरूढं तमादिशेत् । यस्य स्याद्बस्तिरल्पाल्पवेगो हीनमलानिलः ॥ मूर्छार्त्तिजाड्यारुचिमान्दुर्निरूढं तमादिशेत् ॥ विचि
न्तता मनस्तुष्टिः स्निग्धता व्याधिनिग्रहः ॥ आस्थापनस्नेहबस्त्योः सम्यग्दाने तु लक्षणं ॥ अनेन विधिना युञ्ज्यान्निरूहं बस्तिदान
वित् । द्वितीयं वा तृतीयं वा चतुर्थं वा यथोचितं । सस्नेह एकः पवने पित्ते द्वौ पयसा सह । कर्णाकटुमूत्राद्याः कफे चोष्णास्त्रयो हिताः ॥ ५३
पित्तश्लेष्मानिलाविष्टे क्षीररसयूषैः क्रमात् । निरूहं सोऽपि लब्ध्वा ततस्तदनुवासयेत् । सुकुमारस्य वृद्धस्य बालस्य च मृदुर्हितः ॥
बस्तिस्तीक्ष्णाः प्रयुक्ताः स्युस्तेषां हन्याद्बलायुषी । दद्यादुत्क्लेशनं पूर्वं मध्ये दोषहरं ततः । पश्चात्संशमनीयं च दद्याद्बस्तिं विचक्षणः ॥ ए

४ शोधनद्रव्यनिःक्वाथास्तत्कल्कैः स्नेहसैंधवैः॥ युक्ताः खजेन मथिता बस्तयः शोधनाः स्मृताः॥ शोधनबस्तयः॥ ७

शार्ङ्ग राण्डबीजं मधुकं पिप्पली सैन्धवं वचा। हपुषाफलकल्कैश्च बस्तिरुत्क्लेशनः स्मृतः॥ उत्क्लेशनबस्तिः॥ शताह्वा मधुकं बिल्वं कौटजं
५० फलमेव वा। सकांजिकः सगोमूत्रो बस्तिर्दोषहरः स्मृतः॥ दोषहरबस्तिः॥ ॥ प्रियङ्गुर्मधुको मुस्ता तथैव च रसाञ्जनं। सक्षीरः श
स्यते बस्तिर्दोषाणां शमने स्मृतम्॥ संशमनो बस्तिः॥ त्रिफलाक्वाथगोमूत्रक्षौद्रक्षारसमायुताः॥ ऊषकादिप्रतीवापैर्बस्तयो ले
खनाः स्मृताः॥ लेखनबस्तिः॥ बृंहणद्रव्यनिःक्वाथैः कल्कैर्मधुरकैर्युताः। सर्पिर्मांसरसोपेता बस्तयो बृंहणाः स्मृताः॥ बृंहण
बस्तिः॥ बदर्यैरावती शेलु शाल्मली धन्वनागराः। क्षीरसिद्धाः क्षौद्रयुक्ता नाम्ना पिच्छिलसंज्ञिताः। अजोरभ्रेणरुधिरैर्युक्ता देया वि
चक्षणैः। मात्रा पिच्छिलबस्तीनां पले द्वादश सम्मिता॥ पिच्छिलबस्तयः॥ दत्वादौ सैंधवस्याक्षं मधुनः प्रसृतिद्वयं। विनिर्मथ्य ततो
दद्यात्स्नेहस्य प्रसृतित्रयं। एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत्। संमूर्छिते कषायं तु चतुःप्रसृतिसंमितं। क्षिप्त्वा विमथ्य द
द्याद्वस्तिं कुशलो भिषक्। वाते चतुःपले क्षौद्रं दद्यात्स्नेहस्य षट्पलं। पित्ते चतुःपले क्षौद्रं स्नेहं दद्यात्पलत्रयं। कफे च षट्पलं क्षौद्रं क्षिपे
त्स्नेहं चतुःपलं॥ निरूहणमात्राविधिः॥ एरण्डक्वाथतुल्यांशं मधुतैलं पलाष्टकम्। शतपुष्पापलार्द्धेन सैंधवार्द्धेन संयुतं। मधुतैलि
कसंज्ञोऽयं बस्तिः खंजविलोहितः। मेदोगुल्मकृमिप्लीहमलोदावर्तनाशनः। बलवर्णकरश्चैव वृष्यो दीपनबृंहणः॥ मधुतैलिक
बस्तिः॥ क्षौद्राज्यक्षीरतैलानां प्रसृतं प्रसृतं भवेत्। हपुषासैंधवाक्षांशो बस्तिः स्याद्दीपनः परः॥ दीपनबस्तिः॥ एरण्डमूलनि तै ३
ःक्वाथो मधुतैलं ससैंधवं। एष युक्तरथो बस्तिः सवचापिप्पलीफलः॥ युक्तरथो बस्तिः॥ पंचमूलस्य निःक्वाथस्तैलं मागधिका रा म०
मधु। ससैन्धवः समधुकः सिद्धबस्तिरिति स्मृतः॥ सिद्धबस्तिः॥ स्नानमुष्णोदकैः कुर्याद्दिवास्वप्नमजीर्णतां। वर्जयेदपरं सर्वमाच ५०

…दससंयुक्तावर्त्तिर्न… ॥ ॥

कं। नेत्रस्रावे… कवल… थवेत्

फे… लीदपुः… वचामयि…ति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने निरूहबस्तिविधिरध्यायः॥६॥ अथ

…वेसर्वदा॥ अतः परं प्रवक्ष्यामि बस्तिमुत्तरसंज्ञितं। द्वादशांगुलकं नेत्रं मध्ये चक्कृतकर्णिकं। मालतीपुष्पवृंताभं छिद्रं सर्षपनिर्गमं

छे… …शतिवर्षाणामधो मात्रा द्विकार्षिकी। तदूर्द्ध्वं पलमात्रा च स्नेहस्योक्ता भिषग्वरैः। अथास्थापनशुद्धस्य तृप्तस्य स्नातभोजिनः।

स्थितस्य जानुमात्रे च पीठे न्विष्टशलाकया। स्निग्धया मेढ्रमार्गं च ततो नेत्रं नियोजयेत्। शनैः शनैर्घृते तस्मिन्मेढ्रे रन्ध्रे षडंगुलानि ष

टात्ततोऽवपीडयेद्बस्तिं शनैर्नेत्रं तु निर्हरेत्। ततः प्रत्यागते स्नेहे स्नेहबस्तिक्रमो हितः। स्त्रीणां कनिष्ठिकास्थूलं नेत्रं कुर्याद्दशांगु

लं। मूत्रप्रवेशं योऽस्य च योन्यंतश्चतुरंगुलं। द्व्यंगुलं मूत्रमार्गे च सूक्ष्मं … कुर्याद्दशांगुलं। मूत्रप्रवेशं योन्यं च योन्यंतश्चतुरंगुलं

न्यद्व्यंगुलं मूत्रमार्गे च सूक्ष्मं नेत्रं नियोजयेत्। मूत्रकृच्छ्रविकारेषु बालानां त्वेकमंगुलं। शनैर्निष्कंपमार्गं च सूक्ष्मं नेत्रं विचक्षणः। योनि

मार्गे पुनस्त्रीणां स्नेहमात्रा द्विपलिकी। मूत्रमार्गे पलोन्मानां बालानां च द्विकार्षिकी। उत्तानायै स्त्रियै दद्यादूर्ध्वजान्वै विचक्षणः। अ

प्रत्यागच्छति भिषक्कवलानुत्तरसंज्ञिते। अथो बस्तिं निदध्यात्तु संयुक्तं शोधनैर्गणैः। फलवर्त्तिं निदध्यात्तु योनिमार्गे दृढं भिषक्। स्त्र

त्रैवि निर्मितां स्निग्धां शोधनद्रव्यसंयुतां। दह्यमाने तथा बस्तौ दद्याद्बस्तिं विशारदः। क्षीरवृक्षकषायेण पयसा शीतलेन वा। बस्तौ शुक्र

रुजः पुंसां स्त्रीणामार्त्तवजा रुजः। हन्यादुत्तरबस्तिस्तु नो चितो मेहिनां क्वचित्। सम्यग्दत्ते सलिलं निष्यापदः क्रमशश्चाववेत्तरसंज्ञ

स्ससमाने स्नेहबस्तिना। घृताभ्यक्ते गुदे देया फलसूणाङ्गुष्ठसन्निभा। मलप्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता॥ ॥इति फलवर्त्तिः॥ ॥

शार्ङ्ग ॥ ॥इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने उत्तरवस्तिविधिरध्यायः॥ ॥अथ नस्यविधिः॥ ॥
५१ नस्यं तत्कथ्यते धीरैर्नासाग्राह्यं यदौषधं। नावनं नस्यकर्मेति तस्य नामद्वयं मतं। तस्य भेदो द्विधा प्रोक्तो रेचनं स्नेहनं तथा। रेचनं कर्षणं प्रोक्तं
स्नेहनं बृंहणं मतं। कफपित्तानिलध्वंसे पूर्वे मध्येऽपराह्णके। दिनस्य गृह्यते नस्यं रात्रावप्युत्कटे गदे। नस्यं सजेद्भुक्तभक्तो न दुर्दिने चापलंघने =तर्पितः॥३
। तथा नवप्रतिश्यायी गर्भिणी गरदूषितः। अजीर्णी दत्तवस्तिश्च पीतस्नेहोदकासवः। क्रुद्धः शोकाभिभूतश्च तृष्णार्तो वृद्धबालकौ। वेगावरो-
धितापी च स्नातुकामश्च वर्जयेत्। अष्टवर्षस्य बालस्य नस्यकर्म समाचरेत्। अशीतिवर्षादूर्द्ध्वं च नावनं नैव दीयते। अथ वैरेचनं नस्यं ग्रा-
ह्यं तैलैः सुतीक्ष्णकैः। तीक्ष्णभेषजसंसिद्धैः स्नेहैः क्वाथै रसैस्तथा। नासिकारन्ध्रयोर्देयो बद्धलार... श्च बिंदवः। प्रत्येकं रेचने योज्यं मुख्य-
मध्यात्समात्रया। नस्यकर्मणि दातव्यं शाणिकं तीक्ष्णभेषजं। हिङ्गुः स्याद्यवमात्रस्तु माषैकं सैंधवं मतं। क्षीरं चैवाष्टशाणं स्यात्पानीयं
च त्रिकार्षिकं। कार्षिकं मधुरं द्रव्यं नस्यकर्मणि योजयेत्। अवपीडः प्रधमनं द्वौ भेदावपरौ स्मृतौ। शिरोविरेचनस्योक्तौ तौ तु देयौ य-
थायथं। कल्कीकृतादौषधाद्यः पीडितो निःसृतो रसः। सोऽवपीडः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः। षडङ्गुले द्विवक्त्राया नाडी चूर्णं तथा ध-
वक्ति॥ नीन्द्रकोलमितं वक्त्रवातैः प्रधमनं हितं। ऊर्द्ध्वजत्रुगते रोगे कफजे स्वरसंक्षये। अरोचके प्रतिश्याये शिरःशूले च पीनसे। शोफा-
:क्षाप्योम ...नस्यं वैरेचनं स्मृतं। भीरुस्त्रीकृशबालानां नस्यं स्नेहेन शस्यते। गलरोगे सन्निपाते निद्रायां विषमज्वरे। मनोविकारे कृमि- रा म०
मधु सक्षेप्सवः ...। अत्यंतोत्कटदोषेषु विशेषेणु वदीयते। कर्णप्रमेन धीरैस्तु क्षितीक्ष्णतरं यतः॥ नस्यं वैरेचनं पथ्या। नस्यं स्यादुष्टऽश्रु ५१

दरससंयुक्तावर्त्तिर्नस्यार्ग... थवेन वा जलपिष्टेन तेनाक्तिकर्णनासाशिरोगदाः। मन्याहनुगलोद्भूतान घ्नंति हनुपृष्ठजाः॥ मधूकसार
कं। नेत्रस्रावे... कवल... र्षवचामरिचैस्तैश्च वैः। नस्यं कोष्णजलात्पिष्टं दद्यात्तेन प्रबोधनम्। अथ स्मारे तथोन्मादे सन्निपाते पतन्त्रके धर्वं स्त्र
फे... पीदपः... चं सर्षपाः कुष्ठमेव च। वस्तमूत्रेण संपिष्टं नस्यं तन्तु निवारणं। रोहितमत्स्यपित्तेन भावितं मरिचं वचा। कफले चे चित्त
चूर्णं दद्यं प्रधमने बुधैः॥ अथ बृंहणनस्यस्य कल्पना कथ्यते बुना॥ मर्शश्च प्रतिमर्शश्च द्वौ भेदौ स्नेहने मतौ। मर्शस्य तर्पणी
मात्रा मुख्या शाणैः स्मृता षड्भिः। मध्यमा च चतुःशाणैर्हीना शाणमिता स्मृता। एकैकस्मिन्क्षुमात्रं यं दद्यान्नासापुटे बुधैः। मर्शस्य
द्वित्रिवेले वावीसदोषबलाबले। एकान्तरं द्व्यन्तरं वा नस्यं दद्याद्विचक्षणः। अहं यं त्राहं कैंथ वा सप्ताहं वा सुयंत्रितः। मर्शो शिरोवि
रेके च यथा पदो विविधः स्मृताः। दोषोत्क्लेशान्तया चैव विज्ञेयास्ता यथाक्रमं। दोषोत्क्लेश निमित्ता सु सुस्रुम्ना हुमनशोधनं। अथ च
पति मित्रा सु पथ्या स्वेहेहणं मतं। शिरोनासाक्षिरोगेषु सूर्यावर्त्तार्द्धभेदके। दन्तरोगे बलेहीने मन्याकंसभ्रुगदे। मुखशोषक
र्णनादे वातपित्तगदे तथा। अकालपलिते चैव केशश्मश्रुप्रपातने। पुज्यते बृंहणं नस्यं स्नेहैर्वा मधुरद्रवैः॥ बृंहणं नस्य यथा॥ स
शर्करं पयः पिष्टं मद्दृष्टमाषेन कुंकुमं। नस्यप्रयोगतो हन्या द्वातरक्तं भवा रुजः। भ्रूशंखाक्षिशिरःकर्णसूर्यावर्त्तार्द्धभेदकान॥ नस्यं
स्यादणुतैलेन तथा नारायणेन च। माषादिना वा सर्पिर्भिस्तद्गैव जसाधितैः। तैलं कफे स्याद्वाते च केवलेपवने वसा। दद्यान्नस्यं सदा
पित्ते सर्पिर्मज्जानमेव वा। मासात्मगुप्तारास्नाभिर्बीलारुबुकरोहितैः। कृतोऽश्वगन्धया क्वाथो हिङ्गुसैन्धवसंयुतः। कोष्णो नस्यप्र
योगेन पक्षाघातं सकंपनं। जयेदर्दितवातं च मन्यास्तंभापबाहुकौ। प्रतिमर्शस्य मात्रा तु द्विद्विविंदुमिता मता। प्रत्येकशो नासि

